562

# भामतीसमालोचनम्

लेखकः

श्री ज्ञानानन्देन्द्रसरस्वतीस्वामी

प्रकाशनस्थानम् — मैसूरु

मुद्रणस्थानम् — मैसूरु

१९८२]

[मूल्यम् — ६ रूप्यकाणि

## THE AUTHOR

The author, Sri Gyananandendrasaraswathi swamy, who is 92 is a profound Sanskrit scholar and a devout student of the Adwaita Philosophy. He has to his credit over 50 years of intense study and teaching of the commentaries of Sri Shankaracharya on the Brahma Sutras, the Upanishads and the Bhagavad Githa. Having obtained the certificate of Proficiency in Oriental Learning in its relation to Western Philosophy, he received the titles of B.O.L., Vedanta Shiromani from the Madras University in 1917 and Vedantha Visharada from the Madras Sanskrit College. As a Scholar, Swamy commended himself to His (late) Highness Krishnaraja Wodeyar IV of the Mysore Royal dynasty and became an Asthanavidvan. He was a lecturer to His Highness Krishnaraja Wodeyar IV for some time in Advaitha Philosophy. Later he was awarded a scholorship by the Maharaja to study Westren Philosophy along with the M.A. students under Professor A. R. Wadia in the Maharaja's College, Mysore. He is disciple of Sri Satchidanandendra Saraswathi Swamiji

[*See* wrapper pp. 3

# भामतीसमालोचनम्

लेखकः

श्री ज्ञानानन्देन्द्रसरस्वतीस्वामी

प्रकाशनस्थानम्—मैसूरु

मुद्रणस्थानम्—मैसूरु

श्रीमद्वाचस्पतिमिश्रविरचितं भामत्याख्यं ब्रह्मसूत्र शाङ्करभाष्यव्याख्यानं किं भाष्यानुसार्येव भवति ? उतन ? इत्येतद्विचारार्थं तदुभयगतानि कानिद्वाक्यानि सङ्गृह्यन्ते ।

तानीमानि वाक्यानि सम्यग् विमृश्य पण्डितोत्तमाः भामत्याः भाष्यानुसारित्वाननुसारित्वयोर्निर्णयं कुर्वन्तु इति तानेव प्रार्थये ।

मम विमर्शनं ग्रन्थशरीरे
प्रकाश्यते ।

मैसूरु
1-10-82

ज्ञानानन्देन्द्रसरस्वतीभिक्षुः

प्रकाशकौ :

(1) वै. वि. अश्वत्थनारायणशर्मा

(2) वै. वि. शङ्करनारायणशर्मा

कर्णाटकाभिनवशङ्कराचार्या इति सुप्रसिद्धेभ्यः
श्रीमत्परमहंसपरिव्राजकाचार्यवर्येभ्यो ब्रह्मविद्भ्यः
परमपूज्येभ्योऽस्मद्गुरुभ्यः इदानीं ब्रह्मभूयं गतेभ्यः
श्री श्री सच्चिदानन्देन्द्रसरस्वतीस्वामिभ्यः
सप्रणामं इमं भामत्याख्यव्याख्यानसमालोचनाख्यमल्पग्रन्थं
समर्पयामि ।

पुस्तकप्राप्तिस्थानम् :

(1) श्री वै. वि. शङ्करनारायणशर्मा
सूपरिंटेंडेण्ट् इन्जिनियर्
हिन्दुस्थानषिप्यार्ड
चीफ् इन्जनियर् आफीस्
विशाखपत्तनम् (५)

(2) श्री के. जि. सुब्बरायशर्मा
अध्यात्मविद्याप्रवीणः
68 II ब्लाक्
अध्यात्मप्रकाशकार्यालयः
बेंगलूर–28

श्री ज्ञानानन्देन्द्रसरस्वतीभिक्षुः

प्रथममुद्रणम् 1000 प्रतयः

अस्यग्रन्थस्य सर्वं स्वाम्यं
प्रकाशकयोरेव ।

मूल्यम्— ३ रूप्यकाणि ।

मुद्रणस्थानम् :

पारिजातमुद्रणालय, बि.बि. लाय, मैसूरु–४

अत्र निर्दिष्टपुटसंख्याः सूत्रसंख्याश्च

श्री मोतिलाल्बनारसीदासमहाशयैः

मुद्रापितव्याख्यानत्रयसमेतसूत्रभाष्यस्थाः ।

इदं पुस्तकं

अध्यात्मविद्याविद्भ्यः

मूल्यं विना समर्प्यते ।

सांकेतिकाक्षराणामर्थः—

भा. भाष्यम् ।
वा. वाचस्पतिमिश्राः ।
स. समालोचनम् ।
गी. भा. गीताभाष्यम् ।
मू. भा. मूलभाष्यम् ।
अ. वा. अध्यासवादः ।
अनि. वा. अनिर्वाच्याविद्यावादः ।
बृ. बृहदारण्यकोपनिषत् ।

श्री ज्ञानानन्देन्द्रसरस्वतीभिक्षुः

# कृतज्ञताविष्करणम् ।

मदीयं हस्ताक्षरलिखितमल्पग्रन्थं परिशोधितवद्भ्यो होलेनरसीपुरस्थाध्यात्मप्रकाशकार्यालयपण्डितेभ्यः अध्यात्म-विद्याप्रवीणेभ्यः वे. ब्र. श्री. हेच्. यस्. नरसिह्ममूर्तिभ्यः, मदीयं हस्ताक्षरमल्पग्रन्थं परिशोधितवद्भ्यो ऽध्यात्मविद्याप्रवीणेभ्यो बेंगलूरु अध्यात्मकार्यालयपण्डितेभ्यः श्री के. जि. सुब्बरायशर्मभ्यः, हस्तलिखितपुस्तकं परिशोधितेभ्यो वे. ब्र. श्री. वेदान्तशिरोमणि परक्कजे सुब्रह्मण्यभट्टेभ्यः कांश्चिद्विषयान्सूचितवद्भ्योः विद्यालङ्कारेभ्यः यस्. के. रामचन्द्रावाख्यमहात्मभ्यः मुद्रणकार्यसहायकेभ्यो जम्बूर श्री टि. सोमशेखरशर्मभ्यः, सकाले समीचीनतया मुद्रणं कृतवद्भ्यः पारिजातमुद्रणालयस्वामिभ्यः श्रेयःप्राप्तये नारायणं स्मरामि ।

श्री ज्ञानानन्देन्द्रसरस्वतीस्वामी

# अभिप्रायनिवेदनम् ।

भाष्यकाराः "तमेतमविद्याख्यं आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्यादिना एवमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः" इत्यन्तेन ग्रन्थसन्दर्भेण अध्यासस्यानादित्वं प्रमाणप्रमेयव्यवहारकारणत्वं विधिप्रतिषेधमोक्षशास्त्रप्रवृत्तिहेतुत्वं च प्रतिपादयामासुः ।

वाचस्पतिमिश्राः मूलाविद्यास्थाने अनिर्वाच्याविद्यां स्वीकृत्य मिथ्याज्ञानमध्यास इति अध्यासमपि अविद्यां मन्यन्तेस्म । इति ज्ञानानन्देन्द्रस्वामिनो वर्णयन्ति ।

एवं रीत्या वाचस्पतिमिश्रा भाष्यविरुद्धतया अविद्याद्वयमंगीकुर्वन्ति ।

अनिर्वाच्याविद्याव्यवहारोऽपि अध्यासं पुरस्कृत्यैव प्रवृत्तः इत्येतद्वाचस्पतिमिश्रैर्विस्मृतमित्यहं मन्ये ।

अनाद्यनिर्वाच्याविद्याया अनिर्वचनीयवस्तुभूताया ज्ञानबाध्यत्वं न संभवतीत्यतोऽद्वैतहानिः द्वैतापत्तिश्च दुर्निवार्ये ।

बेंगळूरु

1-8-92

सालिग्रामाभिजनः कृष्णसूनुः

रामचन्द्ररायशर्मा

(Sd.) S. K. Ramachandra Rao

# अभिप्रायनिवेदनम् ।

श्रीज्ञानानन्देन्द्रसरस्वतीस्वामिभिर्लिखितं भामतीसमालोचनाख्य-ग्रन्थं आमूलाग्रं विचारपूर्वकं अपठम् । श्री स्वामिभि र्भाष्यवाक्यानि, तद्विरुद्धतया वाचस्पतिमिश्रैर्लिखितानि वाक्यानि च प्रदर्शितानि । तानि वाक्यानि दृष्ट्वा चतुश्शास्त्रपण्डिता-स्सरस्वत्यवतारभूताः सुरेश्वरावतारभूता इति प्रसिद्धाः भाष्यवाक्य-विरुद्धं व्याख्यानं कथं चक्रुरित्येतन्महदाश्चर्यकरमिति मन्ये । व्याख्यानानुसरणपद्धतिस्तु पाण्डित्यापेक्षया बलवत्तरेतिमन्ये, यतः पण्डितप्रकाण्डा अपि विचारदक्षा अपि पञ्चपादिकाकार-व्याख्यानमनुसृत्य भाष्यविरुद्धं व्याख्यानं चक्रुः तद्यथा छां । सुषुप्तौ " सति संपद्य न विदुस्सतिसंपद्यमह इति " श्रुतिस्सुषुप्तौ जीवानां सत्संपत्तिं ब्रूते, भाष्यकारा अपि यस्मादज्ञात्वातं प्रविशन्ति ततस्तद्रूपेणैवागच्छन्ति इत्यवदन् । सुषुप्तौ न किंचिदवेदिषमिति सर्वानुभवः । एतद्विरुद्धत्वेन वाचस्पतिमिश्राः सुषुप्तौ अविद्या लयविक्षेपसंस्कारौ वर्तन्त इति वदन्ति । अस्मिन्पुस्तके श्रीस्वामिभिः भाष्यविरुद्धविषयाः स्वप्रक्रियाविरुद्ध-विषयाश्चसम्यक्प्रदर्शिताः अतो मुमुक्षुभिर्व्याख्यानानुसरणं त्यक्त्वा शाङ्करभाष्यमेवानुसर्तव्यमिति मया सविनयं निवेद्यते ।

परक्कजे
1-9-82

**परकजे सुब्रह्मण्यभट्टः**
वेदान्तशिरोमणिः

# अभिप्रायनिवेदनम् ।

श्री श्री ज्ञानानन्देन्द्रसरस्वतीस्वामिभिर्विरचितो भामत्याख्य-सूत्रभाष्यव्याख्यानसमालोचनाख्योऽल्पग्रन्थो मया समवलोकितः । भाष्यकारैर्मुख्याविद्या अध्यास एवेति स्पष्टमुक्तम् श्रीवाचस्पतिमिश्रैर-विद्याद्वयमंगीकृतम् । आत्मैव सुषुप्तिस्थानमिति सूत्रभाष्ये (3–2–7) प्रतिपादितम् भामत्याख्यव्याख्याने (पु. 327 1–4–18) "लयविक्षेपसंस्कारयोस्तत्रभावात्" इति भाष्यविरुद्धमुक्तम् । वाचस्पतिमिश्रैर्जीवनानात्वं तदुपाधिभूताविद्यायाः अथवा अविद्या-शक्तेर्नानात्वमंगीकृतम् । ज्ञानानन्देन्द्रसरस्वतीस्वामिभिर्नानाजीवेषु, तदुपाधिभूताविद्यासु सतीषु कस्यापि केवलात्मज्ञानं न संभवति, ज्ञानाभावे मोक्षाशा दूरतो निरस्तेतिप्रतिपादितम् । अतो मुमुक्षवः व्याख्यानानुसरणं त्यक्त्वा मूलभाष्यानुसरणेन सर्वानर्थहेतुभूताध्यासं तत्त्वज्ञानेन बाधित्वात्मस्वरूपावस्थानलक्षणं मोक्षमधिगम्यनिर्वृता भवेयुः इति विश्वसिमि ।

**के. जि. सुब्बरायशर्मा**

अध्यात्मविद्याप्रवीणः

बेंगलूरध्यात्मप्रकाशकार्यालयपण्डितः

बेंगलूरु

1–9–82

## A PRE-VIEW

What is presented in this small booklet invites the attention of learned scholars of Advaita Vedanta, who are accustomed to know the philosophy through the commentaries of Vachaspati Misra and Pancapadikakara on Sri Sankara Sutra Bhashya. It has been the objective of the present author, Sri Jnananandendra Saraswati Swamiji to pinpoint how a well known *chatushastrapandita* like Vachaspatimisra has committed errors, nay, injustices on the tradition of the Upanishads, Gaudapada and Sankara, and distorted the essence of pure non-dualism paving the way for onslaughts by later dualistic Vedantas. Sri Swamiji has only highlighted the issues and lists the following errors in the work of Vachaspati Misra :

1. that he misinterprets upanishad-vakyartha
2. opposes Sri Sankara's Bhashyartha
3. contradicts his own statements
4. goes against universal experience
5. puts by SuddhaBrahma jagatkaranatva
6. contradicts his own philosophical concepts
7. opposes the experience of sushupti
8. goes against the upanishadic exposition of the nature of sushupti, and

9. contradicts Sankara's Bhashya regarding the exposition of sushupti.

On each of these the Swamiji quotes actual positions of Vachaspathimisra. He has continued the issue taken up by his revered guru Sri Saccidanandendra Saraswati Swamiji of Holenarasipur.

The earnestness of the author is clearly evident all through when he appeals to *jijnasus* and *mumukshus*. The present book is to be taken along with his previous elaborations of the Advaitic stand he has taken on concepts of the nature of pure non-dual Brahman, on *maya, avidya, jagatkaranatva, jiva-brahma sambandhatva,* and specially on *mula-avidya.* Readers will find in the present venture material to ponder over. Certainly the book provokes a wonder in the minds of readers when it is pointed out how an eminent personality like Vachaspati Misra could commit such grave mistakes.

The book throws a challenge to be met.

*Sd. K. B. Ramakrishna Rao,*
Head of the Department of Philosophy,
Unive sity of Mysore, Mysore.

Manasagangotri,
Mysore.

## FOREWORD

I am glad that His Holiness Sri Sr Jnananandendra Saraswati is adding another significant work into the stream of polemical writings with the aim of purifying our understanding of the philosophical doctrine of Sri Shankara. Its specific theme is that Vachaspati Misra, the father of one tradition in interpreting Shankara, is one in spirit and terminology with the other tradition coming down from Panchapadika, attributed to Padmapada. The argument of the work on hand seems to be perfectly substantiated on the basis of the heavy documentation offered in support from the illustrious Bhamati itself. When that comparatively localised problem is solved happily. It is worthwhile going over briefly the broad metaphysical issues involved, so that the significance of the polemics may be correctly appraised.

(1) For the philosophy under consideration, ultimate reality is one, secondless, integral Brahman, of the nature of unconditioned consciousness. The mundane experience of the

external world, consisting of matter, mutation and plurality, is just an Adhyasa, superimposition, or self-mis-identification covering that transcendent substratum. This Adhyasa is named Avidya or Nescience.

(2) While so much is the common and undisputed ground, secondary problems arise in connection with the second tenet of process of Adhyasa. Panchapadika raises the problem as to how the pure and secondless consciousness or spirit could be misconstrued by way of Adhyasa. Adhyasa when analysed, discloses the element of non-apprehension of the real and the projection of the unreal. So much is admitted in Shankara's Mandukya-Bhashya itself. Between the two elements, the negative factor of non-apprehension is basal, while the misapprehension is the superstructure. Panchapadika finds it impossible to account for the negative factor, unless an alien 'Something', a positive obstructive force is admitted as being operative bringing about the non-apprehension in the context. That force is called Moolavidya, the root-Nescience. Being a pre-supposition of Adhyasa, it is no product of the latter.

(3) The present controversy starts from this postulation of Moolavidya, a positive force, not arising from Adhyasa. It being no projection occuring within Adhyasa, Vedantic enlightenment annihilating Adhyasa leaves it intact. So ultimately two realities remain, the transcendent Brahman and this alien positive force, not posited by Adhyasa and therefore not liable to elimination by the elimination of Adhyasa. This criticism of the Non-dualistic thesis applies with equal cogency against both the Panchapadika and Bhamati versions. That point is ably presented by both Sri Sri Satchidanandendra Saraswathi and Sri Sri Jnananandendra-Saraswathi.

(4) A 'Back to Shankara' movement is in full swing owing to their illuminating lead and a clear failure to find a statement or track of the Moolavidya postulate in the authentic works of Shankara is demonstrated. But where are we now ? We have the absolute principle and its misconstruction on hand and the misconstruction cannot emanate from the knowledge of first principle, for even right apprehension, prama falls within the mis-

construction. We can successfully abolish the solution offered by Panchapadika and followed by even Bhamati. But have we abolished the *problem*? A conclusive proof that it is a pseudo-problem is a desideratum. The statement of the problem and its solution in Panchapadika may be recalled "प्रत्यगात्मनश्चित्स्वभावत्वात् स्वयं प्रकाशमाने ब्रह्मणि स्वरूपानवभासस्य अनन्यनिमित्तत्वात् तद्गतनिसर्गसिद्धाविद्याशक्तिप्रतिबन्धादेव तस्य अनवभासः।" The first part of the statement demands dismissal. But how?

S. S. Raghavachar

**Our answer to the query raised in the Foreword**

As for the postulation of Mulavidya as the cause of Adhyasa, the position adopted by Shankara is as follows:

Adhyasa, which is conceived in its three phases, *viz.*, non-apprehension of reality (agrahana), misapprehension of reality (anyathagrahana), and the doubting of reality (samshayagrahana) does not admit of an explanation in the cause-and-effect formula.

The reason is that the notion of cause and effect arises from the state of Adhyasa, which is the first and basic condition of all empirical knowledge. No metaphysical speculation can ever get behind or beyond this primary state of our individuation. Therefore, the postulation of a cause for Adhyasa is irrelevant as even time and space, which are irrevocably linked with the concept of causality are the projections of this state. Thus the ultimate Reality as determined by Shankara in Adwaita Vedanta is beyond time, space and causality. That is how Shankara builds his system of philosophy on the triple pillars of Shruti (scriptural authority), Anubhava (experience which is universal), and Tarka (logic, which does not contradict Shruti and Anubhava). Therefore, the problem of accounting for Adhyasa (agrahana etc.) as conceived by Panchapadikakara is a fallacious attempt in explaining Shankara's position. The reality is असङ्ग. Therefore no शक्ति exit in it.

The knowledge of the Reality ending in realisation sublates Adhyasa or wrong notion of the Reality. It cannot come within Adhyasa.

—*Author.*

# अत्रस्थविषयानुक्रमणिका


| | | |
|---|---|---|
| 1 | अभिप्रायनिवेदनम् | यस्. के. रामचन्द्राव् मनश्शास्त्रप्राध्यापकः बेंगलूरु विश्वविद्यानिलयः । |
| 2 | ,, | वे. ब्र. श्री. वेदान्तशिरोमणि परक्कजे सुब्रह्मण्यभट्टाः । |
| 3 | ,, | वे. ब्र. श्री के. जि. सुब्बरायशर्मा अध्यात्मविद्याप्रवीणः । |
| 4 | Pre View | Doctor K. B. Ramakrishna Rao Hed of the department of Philosophy Univeısity of Mysore. |
| 5 | Foreword | Doctor S. S. Raghavachar (Retd ) Professor of Philosophy University of Mysore. |
| 6 | Our answer to the query raised in the Foreword | |
| 8 | Gist of the book | Sri M Chandrasekha-rayya, M.A. Regional College, Mysore-6. |

| विषयाः | | पृट सं. |
| --- | --- | --- |
| 9 | प्रस्तावना ... | 1 |
| 10 | मूलाविद्याया अनाद्यनिर्वाच्याविद्याया भेदोनास्ति | 2— 4 |
| 11 | श्री शङ्कराचार्यवर्या एवं वदन्ति । ... | 5— 7 |
| 12 | श्रीवाचस्पतिमिश्राः एवं वदन्ति । ... | 7— 8 |
| 13 | उपनिषद्वाक्यार्थविरुद्धवाक्यानि । ... | 8—11 |
| 14 | भाष्यवाक्यानि तद्विरुद्धवाचस्पतिमिश्रवाक्यानि च | 12—21 |
| 15 | स्वोक्तिविरुद्धवाक्यानि । ... | 22—24 |
| 16 | सार्वत्रिकानुभवविरुद्धवाक्यानि । ... | 25—26 |
| 17 | शुद्धं ब्रह्म जगत्कारणमित्यस्य विरुद्धवाक्यानि । | 27—29 |
| 18 | स्वप्रक्रियाविरुद्धत्वेन प्रतिपादनम् । ... | 30—32 |
| 19 | सुषुप्त्यनुभवविरुद्धवाक्ये । ... | 33—34 |
| 20 | सुषुप्तिविषयकभाष्यवाक्यविरुद्धवाक्यानि । ... | 35—36 |
| 21 | श्रीवाचस्पतिमिश्राणां सुषुप्तिविषयकभाष्यवाक्य-विरुद्धवाक्ये । ... | 37—38 |
| 22 | तत्त्वज्ञानान्तरकर्तव्याभावप्रतिपादकवाक्यविरुद्धत्वेन कर्तव्यं वदन्ति वाचस्पतिमिश्राः । ... | 39—40 |
| 23 | अन्ये दोषाः । ... | 41—45 |

विषयाः पुट सं॰

24 श्रीवाचस्पतिमिश्राः अनेकार्थस्य अन्याय्यत्वात्
इति वदन्ति अनेकार्थं वदन्ति । ... 46—48

25 भाष्यकारैरुपयुक्ताः केचनशब्दाः वाचस्पतिमिश्रैः
भाष्यकारैरुक्तार्थविरुद्धार्थकत्वेन उपयुक्ताः ... 49—51

26 जीवस्वरूपविषये विरुद्धविकल्पः । ... 52

27 जीवस्वरूपवर्णनेविरुद्धविकल्पः । ... 53—55

28 भो. भो. नित्यानित्यविवेकशालिनः विरक्ताः
मुमुक्षवः । ... 56—57

29 शङ्कराचार्योक्तमायालक्षणम् । ... 58—61

30 अध्यासवादस्य महिमा अनिर्वाच्याविद्यावादस्य
निस्सारत्वम् । ...

ग्रन्थकर्ता:



श्री ज्ञानानन्देन्द्रसरस्वतीस्वामी

॥ शुभमस्तु ॥

## प्रस्तावना

शङ्करं शंकराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥

वन्देऽहं ज्ञानदातारं सच्चिदानन्दसद्गुरुम् ।
योऽध्यासरूपमज्ञानं विद्यया बाधितंव्यधात् ॥

श्रीकृष्णस्वाम्यय्यराख्यसद्गुरुं च नमस्करोमि ।
भामत्याख्यसूत्रभाष्यव्याख्यानसमालोचनम् ।

अस्मद्गुरवः श्री श्री सच्चिदानन्देन्द्रसरस्वतीस्वामिनः मया सह आसेतुहिमाचलपर्यन्तं गत्वा तत्रत्यान् पण्डितवरेण्यान् तत्तद्गृहे दृष्ट्वा "भो भोः महाशयपण्डितवरेण्याः, "भाष्यवाक्यार्थानां तद्व्याख्यानवाक्यार्थानां महान् विरोधो दृश्यते । मया रचिते पञ्चपादिकाप्रस्थानमिति ग्रन्थे स विरोधः प्रदर्शितः । स भवद्भि र्विमर्शनीयः" इति तेभ्यस्तत्पुस्तकं दत्वा प्रार्थितवन्तः । एतावत्कालपर्यन्तं न केनापि बिमर्शनं कृत्वा अभिप्रायः प्रेषितः । एते विद्वांस इदानीमपि व्याख्यानानुसारेणैव शिष्यान्बोधयन्ति, न भाष्यानुसरणं कुर्वन्ति । अतो मया व्याख्यानेषु विद्यमाना दोषाः प्रदर्श्यन्तेचेत् ते पण्डिता व्याख्यानानुसरणं हित्वा निर्दुष्टं सूत्रभाष्यमेवानुसरेयुरिति मत्वा व्याख्यानानां समालोचने प्रवृत्तोऽस्मि ।

## मूलाविद्यायाः अनाद्यनिर्वाच्याविद्यायाः भेदोनास्ति

वाचस्पतिमिश्रा अनाद्यनिर्वाच्याविद्यायाः मूलाविद्यायाश्च एकत्वं कुत्रापि व्याख्याने नावोचन् तथापि अविद्याया अनाद्यनिर्वाच्यत्वोक्तेः (पु 103) अनाद्यनिर्वाच्यासचिवं ब्रह्म जगदुपादानकारणमित्युक्तेः अनिर्वाच्याविद्या जगदुपादानकारणं तन्मूलकं ब्रह्म जगदुपादानकारणमित्युक्तेः (पु 419) कारणभूतया लयलक्षणाविद्यया प्राक्सर्गोपचितेन च विक्षेपसंस्कारेणेत्युक्तेः, (पु 327) सुषुप्तौ लयविक्षेपसंस्कारयोर्भावादित्युक्तेश्च, अनेन स्फुटितो मायावादः इत्यन्यत्रोक्तेश्च (पु 2-1-24) मूलाविद्यायाः अनाद्यनिर्वाच्याविद्यायाः एकत्वमेव, नाममात्रे भेद इत्यवगम्यते। पञ्चपादिकाकारैरविद्याद्वयमुक्तं तथैव वाचस्पतिमिश्रैरपि अविद्याद्वयमंगीकृतम्। तेनापि मूलाविद्यावादस्य अनाद्यनिर्वाच्याविद्यावादस्य भेदो नास्तीति स्पष्टं ज्ञायते अध्यासस्यचानाद्यनिर्वाच्याविद्याकार्यत्वमप्युक्तमिति प्रतीयते। अध्यासस्य कुत्रापि अनादित्वानुक्तेः। तस्यानाद्यनिर्वाच्याविद्याकार्यत्वं वाचस्पतिमिश्राणामभिमतमिति गम्यते। (2-1-28) अतो मूलाविद्यावादस्य अनाद्यनिर्वाच्याविद्यावादस्य च भेदोनास्तीति स्पष्टं ज्ञायते एतद्विषये विमर्शनदक्षाः प्रमाणम्।

यद्यपि अन्येषां दोषदर्शनं अयुक्तं तथापि इदानीं दोषप्रदर्शनं विना व्याख्यानानुसरणं न त्यजन्तीति कृत्वा व्याख्यानेषु विद्यमानान् दोषान् प्रदर्शयितुं प्रवृत्तोऽस्मि, दोषप्रदर्शने तात्पर्यं मम नास्ति, व्याख्यानानुसरणं त्याजयितुमेव भाष्यानुसरणं कारयितुमेव दोषोद्घाटनं करोमि एतदर्थं पण्डितप्रवरान् क्षमां कर्तुं प्रार्थयामि ।

श्री वाचस्पतिमिश्राः न्यायकणिकादिग्रन्थकर्तारः, पूर्वमीमांसान्याययोगवेदान्तशास्त्राभिज्ञाः सरस्वत्यवतारभूता, सुरेश्वरावतारभूता इति प्रसिद्धाः । एतादृशैः पण्डितवरेण्यैरपि युक्तायुक्तविचारदक्षैरपि सूत्रभाष्यविरुद्धं व्याख्यानं कृतं, पञ्चपादिकाकाराणा व्याख्यातृणामनुसरणं कृतम् , इत्येतत्प्रथमतः प्रदर्शनीयमिति कृत्वा श्रीवाचस्पतिमिश्राणां भामत्याख्यव्याख्यानसमालोचनं कर्तुं प्रयतिष्ये । यद्यपि कस्मिन्नपि पुरुषे दोषदृष्टिरसमीचीना, पण्डितप्रकाण्डेषु तु दोषदृष्टिरत्यन्तमेवासमीचीना । अतः दोषोद्घाटने मम तात्पार्यं नास्ति दोषप्रदर्शनं विना पण्डिता व्याख्यानानुसरणं न त्यजन्ति सूत्रभाष्यं नानुसरन्ति इत्यतो व्याख्यानेषु विद्यमानादोषाः प्रदर्शिताश्चेत् तदा व्याख्यानानुसरणं हित्वा भाष्यमनुसरेयुरितिमत्वा व्याख्यानेषु विद्यमानदोषोद्घाटने प्रवृत्तोऽस्मि ।

श्री वाचस्पतिमिश्राः चतुश्शास्त्रपण्डिता इत्यत्र न विवादः । एतादृशपण्डिता अपि भाष्यव्याख्यानसमये भाष्यविरुद्धतया

पञ्चपादिकाकाराणां व्याख्यानमनुसस्रुरित्येतदत्यन्ताश्चर्यकरम् । व्याख्यानानुसरणपद्धतिरेवैतस्य कारणमित्यहं मन्ये ।

चतुश्शास्त्रपण्डिता युक्तायुक्तदर्शनकुशला अपि श्रीवाचस्पतिमिश्राः सूत्रभाष्यव्याख्यानसमये पञ्चपादिकाव्याख्यानमनुसृत्य

(1) उपनिषद्वाक्यार्थविरुद्धतया

(2) भाष्यवाक्यार्थविरुद्धतया

(3) स्वोक्तिविरुद्धतया

(4) सार्वत्रिकानुभवविरुद्धतया

(5) शुद्धब्रह्मजगत्कारणत्वविरुद्धतया

(6) स्वप्रक्रियाविरुद्धतया

(7) सुषुप्त्यनुभवविरुद्धतया

(8) सुषुप्तिविषयकोपनिषद्वाक्यविरुद्धतया

(9) सुषुप्तिविषयकभाष्यवाक्यविरुद्धतया च भामत्याख्यव्याख्यानं चक्रुरित्येतदत्यन्ताश्चर्यकरम् ।

अत्रोक्तदोषान् अन्यांश्चदोषान् क्रमेण प्रदर्शयिष्यामि ।

मैसूर,
जम्बूर, हौस,
1-9-1982

ज्ञानानन्देन्द्रसरस्वतीस्वामी

ज्ञानानन्देन्द्रभिक्षुः प्रणमति सततं सच्चिदानन्दभिक्षो-
रध्यासध्वान्तभानोश्चरणकमलयोस्तत्त्वबोधप्रदातुः ।

अध्यासाख्याह्यविद्या न हि भवतिततोऽन्येति यस्तं जनानां
श्रीवेदान्तोक्ततत्त्वं सुविदितमकरोत्सच्चिदानन्दमीडे ॥

श्री सच्चिदानन्देन्द्रसरस्वतीसद्गुरुभ्योनमः ।

श्री के. ये. कृष्णस्वाम्यय्यराख्यसद्गुरुभ्यश्चनमः ।

श्रीमच्छङ्करचार्यवर्या एवं वदन्ति ।

(1) सर्ववेदान्तप्रतिपाद्यं तत्त्वमात्मैकत्वमेव ।

(2) अध्यासाख्याविद्यया द्वैतप्रपञ्चः कल्पितः ।

(3) आत्मानात्मानोरितरेतराध्यास एवानर्थकरत्वात्प्रधाना-
विद्या ।

(4) अग्रहणसंशयग्रहणे चाविद्ये ।

(5) अध्यासानन्तरमेव प्रमाणप्रमेयव्यवहारः, अतोऽध्यासो
न प्रमाणसिद्धः ।

(6) अध्यासस्सर्वानुभवसिद्धः ।

(7) अध्यासंपुरस्कृत्यैव सर्वो वैदिको लौकिकश्च व्यवहारः
प्रवर्तते ।

(8) अध्यासरूपाविद्याकल्पिता माया ।

(9) अनाद्यनन्तोप्यध्यासो मिथ्याज्ञानरूपत्वात् ।
तत्त्वज्ञानेन बाध्यते ।

(10) कालदेशादीनामपि अध्यासएवकारणम् ।
अतोऽध्यासस्य-कालनिष्ठजन्मनाशौ न संभवतः ।

(11) अध्यासरूपाविद्यायामवगतिपर्यन्तविद्यया बाधितायां सत्यां स्वस्वरूपावस्थानरूपमोक्षस्सिद्ध्यति ।

(12) आत्मैवसुप्तिस्थानम् ।

श्री वाचस्पतिमिश्राः चतुश्शास्त्रपण्डिता अपि व्याख्यानानुसरणपद्धतिं अनुसृत्य भाष्यविरुद्धमपि व्याख्यानं चक्रुः ।

" यद्यदाचरति श्रेष्ठस्तत्तदेवेतरोजनः ।
सयत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।"

इति भगवदुक्त्यनुसारेण प्रकरणग्रन्थकर्तारस्सर्वेऽपि भाष्यविरुद्धं पञ्चपादिकाभामतीत्यादिव्याख्यानमनुसस्रुः । महाविद्वांसोपि विमर्शनं विना व्याख्यानानुसारेणैव संस्कृतमहापाठशालासु शिष्येभ्यः वेदान्तशास्त्रमुपदिदिशुः । श्रीमद्रामानुजाचार्याः श्रीमध्वाचार्याः व्याख्यानानुसारेणैव अद्वैतं ज्ञात्वा तत्खण्डनायप्रवृत्ताः, मूलभाष्यानुसारेणाद्वैतं विदित्वा तन्नखण्डितम् । लोकेऽपि व्याख्यानानुसारेणैव अद्वैतसिद्धान्तप्रचारोऽभूत् । इतःपरं व्याख्यानेषु विद्यमानं भाष्यविरुद्धं अभिप्रायं त्यक्त्वा भाष्याविरुद्धविषयान्

न्विद्वद्वरेण्याः गृह्णन्तु इति तान्प्रार्थयामि अत्र वाचस्पतिमिश्रैरुक्ता भाष्यविरुद्धविषयान् प्रदर्शयिष्यामि ।

---

## श्री वाचस्पतिमिश्राः एवं वदन्ति

(1) मंगलश्लोके अनिर्वाच्याविद्याद्वितयसचिवस्येत्यादिना अनिर्वाच्यानाद्यविद्या एका, अध्यासरूपाविद्यापरा । इति द्वे अविद्ये वाचस्पतिमिश्राः अंगीकुर्वन्ति । अध्यासरूपाविद्या मिथ्याज्ञानरूपा, कार्याविद्या । अनिर्वाच्याविद्या जगदुपादानकारणी भूता अनिर्वचनीयवस्तुभूता । अध्यासस्यापि कारणीभूता ।

पु. 103 1-1-5

(2) अनाद्यनिर्वाच्याविद्यासचिवं ब्रह्म जगदुपादानकारणम् ।

पु. 100 1-1-4

(3) अनाद्यनिर्वाच्याविद्याशक्तिमच्चेतनोपादानं जगदागमिकमिति ब्रह्मविदः ।

पु. 35 1-1-1

(4) निश्श्रेयसफलंतु ब्रह्मविज्ञानं शब्दज्ञानाभ्यासान्नानुष्ठानान्तरमपेक्षते ।

पु 103 1-1-5

(5) यद्यपि कूटस्थनित्यस्यापरिणामिन औदासीन्यमस्य वास्तवं तथाप्यनिर्वाच्याविद्यावच्छिन्नस्य व्यापारवत्वमवभासत इति कर्तृत्वोपपत्तिः ।

पु 1-1-2

(6) अविद्यासहितं ब्रह्मोपादानं जगत् ।

(7) अविद्यापदस्य—मिथ्याज्ञानमिति एकोऽर्थः । अनाद्य-निर्वाच्याविद्या अनिर्वचनीयवस्तुभूतेति अन्योऽर्थः ।

(8) ब्रह्माश्रिता अनिर्वाच्याविद्या वस्तुभूतापि तत्त्वज्ञानेन बाध्यते ।

(9) सुषुप्तौ लयविक्षेपसंस्कारौ लयलक्षणाविद्या च वर्तन्ते । इत्यादीनि ।

---

## उपनिषद्वाक्यार्थविरुद्धवाक्यानि

ऐ 1-1-1

1 (1) आत्मा वा इदमेक एवाग्र आसीत् ।

3-4-10

(2) ब्रह्म वा इदमग्र आसीत् ।

बृ 3-4-1

(3) ब्रह्मैवेदमग्र आसीत् ।

छां 6-2-1

(4) सदेव सोम्येदमग्र आसीत् ।

समालोचनम् । इमानि उपनिषद्वाक्यनि सृष्टेः पूर्वं आत्मा एक एवासीदिति उद्घोषयन्ति ।

वाचस्पतिमिश्रास्तु–मङ्गलश्लोक एव अनाद्यनिर्वाच्याविद्या-मंगीकुर्वन्ति ।

पु. 17 1-1-1

अनिर्वचनीयानाद्यविद्या ।

पु. 41 1-1-1

अनिर्वचनीयानाद्यविद्यावशात् ।

पु. 235 1-3-19

अनिर्वाच्यानाद्यविद्यावशात् ।

पु. 336 1-4-22

अनिर्वचनीयानाद्यविद्योपाधानभेदात् ।

पु. 906 4-4-22

द्विचाविद्यातमः इत्यादि वाक्यैरनाद्यनिर्वाच्याविद्यामपि उपनिषद्वाक्यविरुद्धत्वेनांगीकुर्वन्ति । अनेन द्वैतापत्तिरद्वैत-हानिश्च संभवतः ।

2 (1) ब्रह्मविदाप्नोति परम् ।

नै ॥ आनन्दवल्ली द्वितीयाध्याये प्रथमोनुवाकः

(2) ब्रह्मवेद ब्रह्मैव भवति ।

मु 2-2-8

नु (3) क्षीयन्तेचास्य कर्माणि तस्मिन्दृष्टे परावरे ।

तै 2-9

अनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन ।

बृ 4-34

(4) अभयं वै जनकप्राप्नोऽसि ।

वा ब्रा उ 1-4-10

(5) तदात्मानमेवावेत् अहं ब्रह्मास्मीति । तस्मात्तत्सर्वमभवत् ।

ई7(6) तत्रकोमोहः कः शोकः एकत्वमनुपश्यतः ।

इत्यादि उपनिषद्वाक्यानि केवलात्मज्ञानेन मोक्षं वदन्ति ।

स ॥ वाचस्पतिमिश्राणां प्रक्रियानुसारेण केवलात्मज्ञानमेव कस्यापि न संभपति-तथाहि । वाचस्पतिमिश्रा एवं वदन्ति ।

पु. 297 1-4-3

(1) न वयं प्रधानवदविद्यां सर्वजनेषु एकामाचक्ष्महे, येन एवं उपालभ्येमहि, किन्त्वियं प्रतिजीवं भिद्यते ।

पु. 297 1-4-3

यस्यैव जीवस्य विद्योत्पन्ना तस्यैवाविद्यापनीयते ।

पु. 308 1-4-9

(2) अविद्याशक्तिः योनिः । सा च प्रतिजीवं नानेत्युक्तम् । अतो वीप्सोपपन्ना ।

233 1-3-19

(3) पौर्वापर्यालोचनया वेदान्तानामेकमद्वयं आत्मतत्त्वं । जीवास्तु अविद्योपाधानकल्पिता इत्यत्र तात्पर्यमवगम्यते ।

स ॥ वाचस्पतिमिश्रैरेवंरीत्या जीवनानात्वं तदुपाधिभूताया अविद्याया अथवा अविद्याशक्तेरपि नानात्वमुक्तम् । अविद्या-शब्देन तैर्नाध्यासमात्रमुक्तम् । किन्तु अनाद्यनिर्वाच्याविद्या-प्युक्तम् । सा चानिर्वाच्यानाद्यविद्या नाध्यासकल्पिता किन्तु अध्यासस्य उपादानकारणीभूता । एतादृशाविद्योप-धानकल्पितेषु नानाजीवेषु, तदुपधिभूतापु नानाविद्यासु अथवा नानाविद्याशक्तिषु सतीषु कस्य वा केवलात्मज्ञानं कथं संभवति ? केवलात्मज्ञानाभावे मोक्षाशा दूरतोगता । नैव संभवतीत्यर्थः ।

## भाष्यवाक्यानि तद्विरुद्धवाचस्पतिमिश्रवाक्यानि च

भा. अ. भा.

(1) तमेतमेवं लक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते ।

पु. 25-1-1-1

वा ।। अनिर्वाच्याविद्यासचिवस्येति अनिर्वाच्याविद्यां ।

स ।। मिथ्याज्ञानं अध्यासः इति अध्यासंच अविद्यामाहुः, अयमर्थः भाष्यसम्मत; ।

भा. अ. भा.

(2) एवमयमनादिरनन्तो नैसर्गिकोध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः ।

पु. 419 2-2-2

वा ।। कारणभूतया लयलक्षणयाविद्ययेति लयलक्षणाविद्यायाः अध्यासकारणत्वमुक्तम् ।

स ।। एतद्भाष्यविरुद्धम् । भाष्यकारैरध्यासस्यानादित्वमुक्तम् ।

पु. 76 1-1-4

(3) भा ।। तथाचाचार्यप्रणीतं सूत्रं, दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदन्तरापायादपवर्गः ।।

वा ।। मिथ्याज्ञानं चाविद्या रागाद्युपजननक्रमेण दृष्टैनैव संसारस्य परमं निदानम् । सा च तत्त्वज्ञानेन ब्रह्मात्मैकत्वविज्ञानेना । गतिपर्यन्तेन विरोधिना निवर्त्यते ततोऽविद्यानिवृत्या ब्रह्मस्वरूपाविर्भावो मोक्षः ।

स ॥ सामान्यतः एतत्पठनेन न किञ्चिद्विरुद्धं दृश्यते । एवमुपायेन एतद्रचितम् । एतन्मते मिथ्याज्ञानशब्दस्य द्वावर्थौ । एकः— अध्यासः, अन्या अनाद्यनिर्वाच्याविद्या । अध्यासस्तत्त्वज्ञानेन बाध्यत इत्यत्र न विरोधः अनाद्यनिर्वाच्याविद्या तत्त्वज्ञानेन कथं बाध्यते ? सा चानिर्वचनीयवस्तुभूता । सा कथं ज्ञानेन बाध्यते ? अविद्यानिवृत्त्या ब्रह्मस्वरूपाविर्भावो मोक्षः अनाद्यनिर्वाच्याविद्यानिवृत्तिरेव न भवति । मोक्षाशा नास्ति ।

पु. 25 1-1-1

भा ॥ मिथ्याप्रत्ययः—अध्यासः ।

वा ॥ मिथ्याप्रत्ययानां रूपं अनिर्वचनीयत्वं तद्यस्य स तथोक्तः— अनिर्वचनीय इत्यर्थः ।

स ॥ मिथ्याप्रत्ययरूपइत्यस्य-- मिथ्याप्रत्ययानां रूपं अनिर्वचनीयत्वं--इत्यर्थः भाष्यविरुद्धः । मिथ्याप्रत्यय इत्यस्य भाष्ये न कुत्रापि अनिर्वचनीयत्वार्थः प्रतिपादितः ।

भा ॥ अनृतम्— अविद्यमानं विद्यमानमिवावभासमानम् ।

वा ॥ अनृतम्— अनिर्वाच्यम् ।

स ॥ अनृतशब्दस्य अनिर्वाच्यार्थो भाष्यविरुद्धः ।

पु. 85 1-1-1

भा ॥ अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितम् । . . . . आत्मा च ब्रह्म ।

वा ॥ अनिर्वचनीयानाद्यविद्याशक्तिमच्चेतनोपादानं जगदागमिकमिति ब्रह्मविदः ।

स ॥ इदं भाष्यवाक्यस्यव्याख्यातं भवति किम् ?

पु. 35 1–1–1

भा ॥ निश्श्रेयसफलं तु ब्रह्मविज्ञानं नानुष्ठानान्तरापेक्षम् ।

वा ॥ शब्दज्ञानाभ्यासान्नानुष्ठानान्तरमपेक्षते ।

स ॥ शब्दज्ञानाभ्यासमपेक्षत इति भाष्यविरुद्धमुक्तम् ।

पु. 29, 30 1–1–1

भा ॥ धर्मजिज्ञासया: प्रागपि अधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः ।

वा ॥ निर्विचिकित्सवाक्यार्थभावनापरिपाकसहितमन्तःकरणं त्वंपदार्थस्यापरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थतामनुभावयतीतियुक्तम् । न चायमनुभवो ब्रह्मस्वभावो येन न जन्येत, अपित्वन्तःकरणस्यैव वृत्तिभेदो ब्रह्मविषयः ।

स ॥ भाष्यकाराः " धर्मजिज्ञासायाः प्रागपि अधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः " इत्यवोचन् । वाचस्पतिमिश्रास्तु वाक्यार्थभावनापरिपाकसहितमन्तःकरणं त्वं पदार्थस्यापरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थतामनुभावयतीति युक्तम् । न चायमनुभवो ब्रह्मस्वभावो येन नजन्येत, अपितु अन्तःकरणस्यैव वृत्तिभेदो ब्रह्मविषयः । इत्यवोचन् । इदं व्याख्यानं भवति किम् ? अनुभवसमये अन्तःकरणवृत्तिर्वर्तते

किम् ? अविषयस्य ब्रह्मणोऽन्तःकरणवृत्तिभेदविषयत्वं चोक्तम् । अत्र ब्रह्मजिज्ञासा विचारो नास्ति ।

पु. 75 1-1-1

(9) भा ॥ अस्यानर्थहेतोः प्रहाणाय ।

वा ॥ जविद्याद्वयप्रतिबन्धापनयमात्रेण विद्याया मोक्षसाधनत्वम् ।

स ॥ अध्यासस्य ज्ञानबाध्यत्वं दृष्टम् । अनाद्यनिर्वाच्याविद्याया ज्ञानबाध्यत्वं न संभवति । भाष्ये अस्य इति एकवचनं विद्यते अविद्याद्वित्वं एकवचनेन न संभवति ।

पु. 297 1-4-3

(10) भा ॥ अविद्यात्मिका हि माया साचावश्याभ्युपगन्तव्या । अर्थवसीहि सा ।

वा ॥ यदि ब्रह्मणोऽविद्याशक्त्यासंसारः प्रतीयते हन्त मुक्तानामपि पुनरुत्पादप्रसंगः, तस्याः प्रधानवत्तादवस्थ्यात् तद्विनाशे वा संसारोच्छेदः तन्मूलाविद्याशक्तेर्दाहात् ।

स ॥ तच्छब्देनात्र संसारः गृह्यते । तन्मूलाविद्याशक्तिः— अनिर्वाच्यानाद्यविद्याशक्तिरेव सा तु प्रधानवत् वस्तुभूता । सा कथं ज्ञानबाध्याभवति ?

पु. 85 1-1-1

भा ॥ अस्ति तावद्ब्रह्मनित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्ति-समन्वितम् . . . . आत्मा च ब्रह्म ।

वा ॥ अनेनैव गीयमानाद्यविद्याशक्तिसचिवब्रह्मोपादानं जगदागमिक-
मिति ।

स ॥ इदं भाष्यवाक्यव्याख्यानं भवति किम् ?

पु. 75 1–1–2

भा ॥ ब्रह्मजिज्ञासितव्यमित्युक्तम् । किं लक्षणं पुनस्तद्ब्रह्मेत्यत-
आह भगवान् सूत्रकारः “ जन्माद्यस्य यतः ” इति ।

वा ॥ अविद्यासहितं ब्रह्मोपादानं जगत् ।

स ॥ आत्मा च ब्रह्मेत्युक्तत्वाच्छुद्धं ब्रह्मैव जगत्कारणमित्युक्त-
भवति सगुणं ब्रह्म सर्वेषामात्मा न भवति ।

पु. 904 4–1–2

प्रकृतं सद्ब्रह्मेक्षितृ जगतो जन्मादिकारणमुच्यते “ सत्यं ज्ञानमनन्तं ब्रह्म,” “ विज्ञानमानन्दं ब्रह्म ” “ अदृष्टं द्रष्टृ ” “ अविज्ञातं विज्ञातृ,” “ अजमजरममरम् ” “ अस्थूलमनणु अह्रस्वमदीर्घम् ” इत्यादिना शुद्धब्रह्मण-
एव जगत्कारणत्वमुक्तम् ।

वा ॥ अनाद्यनिर्वाच्याविद्यासचिवं ब्रह्मजगत्कारणम् ।

स ॥ भाष्यकाराश्शुद्धब्रह्मण एव जगत्कारणत्वमूचुः वाचस्पति-
मिश्रास्तद्विरुद्धतया अनाद्यनिर्वाच्याविद्यासचिवं ब्रह्मजग-
त्कारणमित्यूचुः ।

पु 1–1–5

भा ॥ ब्रह्मैवेक्षितृ ।

वा ॥ अनाद्यनिर्वाच्याविद्यासचिवं ब्रह्म ईक्षितृ ।

स ॥ "असंगोह्ययं पुरुषः" इत्युक्तरीत्यासंगस्य ब्रह्मणोऽनाद्यनिर्वाच्याविद्यासचिवत्वं कथं संभवति ? ब्रह्म स्वयमशक्तं किम् ? इदंभाष्यविरुद्धम् ।

पु. 397 2-1-24

(13) भा ॥ तस्मादेकस्यापि ब्रह्मणः विचित्रशक्तियोगात्क्षीरादिवत् विचित्रपरिणाम उपपद्यते ।

वा ॥ अनिर्वाच्यनामरूपबीजसहायत्वात् ।

स ॥ ब्रह्म स्वत एव विचित्रपरिणामकारणं भवति । न अनिर्वचनीयनामरूपबीजमायासहायमपेक्षते । इदमपि भाष्यविरुद्धम् ।

पु. 298 1-4-3

(14) यदातु जीवो महान् तदापि अव्यक्ताधीनत्वाज्जीवभावस्य महतः परमित्युक्तम् । "**अविद्याह्यव्यक्तं**" अविद्यावत्त्वेनैव जीवस्य सर्वस्संव्यवहारः संततो वर्तते ।

वा ॥ यद्यपि जीवाव्यक्तयोरनादित्वेनानियतं पौर्वापर्यं तथाप्यव्यक्तस्य पूर्वत्वं विवक्षित्वैतदुक्तम् ।

स ॥ भाष्यकाराः सर्वत्राविद्याशब्देन अन्यथाग्रहणमेव वदन्ति तथाचात्रापि अविद्याह्यव्यक्तमित्यत्र अविद्याशब्देन अन्यथाग्रहणरूपाध्यासमेवावोचन् नाव्यक्तमवोचन् । अत एव अविद्यावत्त्वेनैव जीवस्य सर्वः संव्यवहारस्संततोवर्तते

इत्यवदन् । वाचस्पतिमिश्राः एतदज्ञात्वा द्वितीये पर्यायेऽपि अव्यक्तमेवोक्तमिति जानन्तिस्म । व्याख्यानानुसरणस्य फलमेतत् ।

(15) भा ॥ स्वयं प्रसिद्धमेतच्छारीरस्य ब्रह्मात्मत्वमुपदिश्यते ।

वा ॥ ब्रह्मणोजीवभावः न **काल्पनिकः** किन्तु भाविकः अंशोहि सः, तस्य कर्मसहितेन ज्ञानेन ब्रह्मभाव आधीयते इत्यतआह स्वयंप्रसिद्ध इति ।

स ॥ जीवभावस्य काल्पनिकत्वाभावे कथं ज्ञानेन बाध्यते ?

पु. 2७7 1-4-3

(18) भा ॥ मुक्तानां च पुनरनुत्पत्तिः । कुतः । विद्यया तस्या बीजशक्तेर्दाहात् । अविद्यात्मिका हि भीजशक्तिः अव्यक्त-शब्दनिर्देश्या, परमेश्वराश्रया मायामयी माहासुप्तिः ।

वा ॥ न वयं प्रधानवदविद्यां सर्वजीवेष्वेकामाचक्ष्महे, किन्त्वियं प्रतिजीवं भिद्यते, तेन यस्यैव जीवस्य विद्योत्पन्ना तस्यैवाविद्यापनीयते न जीवान्तरस्य ।

स ॥ भाष्यकारमते अविद्या–अध्यासरुपमिथ्याज्ञानं । मिथ्याज्ञानं सम्यज्ञानेन बाध्यत इत्येतद्दृष्टम् । वाचस्पतिमिश्रमते अविद्या अध्यासरूपा एका अनिर्वाच्यानाद्यविद्या अपरा । अध्यासरूपाविद्या ज्ञानबाध्या भवति । अनाद्यनिर्वाच्या-विद्या अनिर्वचनीयवस्तुरूपा, सा ज्ञानबाध्या न भवति तेन

अद्वैतहानिः द्वैतापत्तिश्च । भाष्यकाररीत्या अविद्याकल्पिता बीजशक्तिः, वाचस्पतिमिश्रमते अध्यासरूपाविद्योपादान-कारणीभूता बीजशक्तिः ।

पु. 308 1–4–9

भा ॥ पारमेश्वर्याश्शक्तेः समस्तजगद्विधायिन्याः वाक्योपक्रमे अवगमात्, वाक्यशेषेऽपि "मायांतु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" । (श्वे 4-10) इति " यो योनिं योनिमधितिष्ट-त्येकः " इति तस्या एवावगमान्न स्वतन्त्रा काचित्प्रकृतिः प्रधानं नाम अजामन्त्रेण आम्नायते इति शक्यते वक्तुम् ।

वा ॥ अविद्याशक्तिर्योनिः, सा च प्रतिजीवं नानेत्युक्तम् ।

स ॥ 1–4–9 अस्मिन्नेव सूत्रभाष्ये " परमेश्वरादुत्पन्ना ज्योतिःप्रमुखतेजोबन्नलक्षणा चतुर्विधस्य भूतग्रामस्य प्रकृति-भूतेयमजा प्रतिपत्तव्येत्युक्तम् । भाष्यकाराः अत्र परमेश्वरा-दुत्पन्ना प्रकृतिः अजाशब्देनोच्यते इत्यवदन् । बहुषुस्थलेषु अविद्याकल्पिता प्रकृतिरित्यवदन् । वाचस्पतिमिश्रास्तु अनाद्यनिर्वाच्याविद्याशक्तिः योनिः सा च प्रतिजीवं नाना इति भाष्यविरुद्धतया अवोचन् ।

पु. 401 1–1–28

(16) भा ॥ " आत्मनिचैवं विचित्राश्च हि " (सूत्र)

भा ॥ आत्मन्येकस्मिन् स्वप्नदृशि स्वरूपानुपमर्देनैव विचित्रा हस्त्य-श्वादिसृष्टयो भवन्ति ।

वा ॥ स्वप्नदृगात्मा मनसैव स्वरूपानुपमर्देन रथादीन् सृजति । अनेन स्फुटितो मायावादः ।

स ॥ भाष्ये स्वप्ने केवलात्मना सृष्टिरुक्ता । वाचस्पतिमिश्रैस्तद्विरुद्धतया स्वप्नदृगात्मा मनसैव रथादीन् सृजति इत्युक्तम् । तन्मनः जाग्रन्मनोवा स्वाप्निकमनोवा ? स्वप्नदृगात्मा स्वतो रथादीन् स्रष्टुमशक्तः किम् ? स्वप्नदृशि विचित्रा सृष्टयो भवन्ति इत्यस्य पञ्चपादिकाकारोक्तमायावादस्य च संबंधोनास्ति । तद्बुद्धिस्थो मायावादः स्फुटितः ।

पु॰ 352 2-1-3

(17) भा ॥ सांख्यस्मृतिप्रत्याख्यानेन योगस्मृतिरपि प्रत्याख्याता द्रष्टव्या ।

वा ॥ उपनिषदुपायस्य च तत्त्वज्ञानस्य योगापेक्षास्ति ।

स ॥ चित्तवृत्तिनिरोधरूपयोगेन मोक्षो न भवतीति भाष्यकाराणामभिप्रायः । योगशास्त्रविहितयमादिसाधनानि ध्यानादिसाधनानि च ज्ञानोत्पत्यर्थं अंगीकृतानि । योगस्य साक्षान्मोक्षसाधनत्वं न भवतीति भाष्यकारैरुक्तम् । वाचस्पतिमिश्रैर्योगस्य साक्षान्मोक्षसाधनत्वमंगीक्रियते किम् ?

"मायां तु प्रकृतिं विद्यात्" इत्यत्र माया—असद्वस्त्वात्मिका सद्वस्त्वात्मिकेवप्रतिभासमाना इत्यवगन्तव्यम् । उपनिषत्काले पञ्चपादिकाकारैरुक्तलक्षणलक्षिता माया नासीत् अतो मायां प्रकृतिं

विद्यात् इत्यत्र मायाशब्दार्थः अविद्यमाना विद्यमानेवावभासमाना माया इत्येवार्थः—

मायाया अविद्याकल्पितत्वे सा ज्ञानबाध्या भवति। अनाद्यनिर्वाच्याविद्यास्वरूपत्वे ज्ञानबाध्या न भवति। वाचस्पतिमिश्रमते वर्णकद्वयेऽपि अव्यक्तशब्देन अव्यक्तमेवोक्तम्। तथाच अव्यक्तं हि अव्यक्तम् इत्युक्तं भवति। तस्मादव्यक्तशब्देनात्राध्यासरूपाविद्योक्तेत्यवगन्तव्यम्। मायां तु प्रकृतिं विद्यात् इत्यस्यार्थः अविद्यमाना विद्यमानेवाभासमाना या तां प्रकृतिं विद्यात् इत्यर्थः तथाच वस्तुतो प्रपञ्चस्य विद्यमानं कारणं नास्ति तस्मात्कार्यभूतप्रपञ्चोऽपि नास्तीत्येवार्थः—

महेश्वरं मायिनं विद्यात् इत्यस्य महेश्वरः मायावी अविद्यमानं प्रपञ्चं विद्यमानमिवावभासयतीत्यर्थः अथवा—

प्रकृतिं—मायां, विद्यात्। तस्यार्थः माया अविद्यमाना विद्यमानेवावभासते इत्यर्थः। प्रकृतित्वेन प्रकृतिः प्रसिद्धा, तस्याः मायात्वं प्रतिपाद्यते।

# स्वोक्तिविरुद्धवाक्यानि

पु. 261, 62 1–3–30

(1) कर्मविक्षेपसंस्कारसहितलयलक्षणाविद्याऽव शेषतासाम्येन स्वापप्रलयावस्थयोरभेद इति द्रष्टव्यम् ।

पु. 327 1–4–18

(2) तस्माद्यत्रास्यात्मनो यतो निस्संबोधोऽतः स्वच्छतारूपमिव स्वच्छतेति स्वच्छतारूपो, न तु स्वच्छतैव, लयविक्षेप-संस्कारयोस्तत्र भावात् , समुदाचरद्वृत्तिविक्षेपाभावमात्रेणोपमानम् ।

स ॥ वाचस्पतिमिश्रैरेतयोरुभयोस्स्थलयोः सुषुप्तौ लयलक्षणाविद्या, लयविक्षेपसंस्कारौ च अंगीकृताः तैरेव तद्विरुद्धतया ।

पु. 634, 635 3–2–7

(1) तथाच सिद्धमस्य तदा ब्रह्मात्मत्वमित्यर्थः । ब्रह्मभूयःप्रति-पादने किञ्चित्प्रयोजनमस्ति । उपाधिलये जीवस्य अन्यत्र-स्थित्ययोगात् ब्रह्मण्येव स्वाप आस्थेयः इत्यर्थः ।

पु. 328 1–3–15

(2) स्वापकाले हि सर्वएवायं विद्वानविद्वांश्च जीवलोको हृत्पुंडरीकाश्रयं दहराकाशाख्यं ब्रह्मलोकं प्राप्तोऽपि इति ।

स ।। एतयोस्थलयोः ब्रह्मप्राप्तिरंगीकृता पुनरत्रैवतद्विरुद्धतया अनाद्यविद्यातमःपटलदृष्टितया ब्रह्मभूयमापन्नोऽहमिति न वेदेत्युक्तम् ब्रह्मलोकं इत्यत्र ब्रह्मैव लोकः— ब्रह्मलोकः तं ब्रह्मलोकं इति अत्रैवोक्तम् । ब्रह्मप्राप्तस्याविद्यातमःपटलदृष्टित्वं विद्यते किम् ? विद्यते चेत् ब्रह्मप्राप्तिः कथम् ।

पु. 17

(1) सत्यं स्वयंप्रकाशत्वादनंशत्वाच्चात्मा **अविषयः**

पु. 17

(2) सचात्मापराधीनप्रकाशत्वादनंशत्वाच्च **अविषयः**

पु. 18

(3) प्रत्यगात्माविषयः इति ब्रूमः

एतद्विरुद्धत्वेन

पु. 31

(1) अन्तःकरणस्यैव वृत्तिभेदो **ब्रह्मविषयः**

पु. 80

(1) न साविद्या ब्रह्माश्रया किन्तु **जीवे** सा अनिर्वाच्या ।

पु. 165

(1) तादृशां च **जीवाना**मविद्या न तु निरुपाधिनो ब्रह्मणः

तद्विरुद्धतया

पु. 296

(2) ब्रह्मणस्त्वियमविद्याशक्तिः मायादिशब्दवाच्या ।

पु. 375

(1) ब्रह्मणो जीवभावः न काल्पनिकः किन्तु **भाविकः**

तद्विरुद्धतया

पु. 659

तस्मादनाद्यविद्याविक्रीडितमेवैतस्यात्मतो जीवभावभेदो **न भाविकः**

पु. 337 1-4-22

तस्मादनिर्वाच्याविद्यापरिकल्पितएवांशः न भाविंकः.

पु. 5 9 2-3-29

तथाच बुद्ध्युपाधिकृतमस्य जीवत्वम्

स ॥ भिन्न भिन्न स्थलेषु भिन्नभिन्नरूपेण जीवत्वमुक्तम् ।

---

## सार्वत्रिकानुभवविरुद्धवाक्यानि ।

(1) सर्वे जनाः स्वभावेनैव देहेन्द्रियादिषु अहं ममाभिमानवन्तः दृश्यन्ते । इयमेवाविद्या । भाष्यकारैरपि (भा ॥ पु. 207) "देहादिष्वनात्मसु अहमस्मीत्यात्मबुद्धिरविद्या" इत्युक्तम् । अध्यासभाष्ये "तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्त" इत्युक्तम् ।

अध्यासस्तु सर्वजनानुभवसिद्धः । न प्रमाणसिद्धः । अध्यासं पुरस्कृत्यैव सर्वे प्रमाणप्रमेयव्यवहाराः ।

वा ॥ (1) मिथ्याज्ञानं–अध्यासः—अविद्या

(2) अनाद्यनिर्वाच्याविद्यापि—अविद्या

स ॥ अधीतव्याख्यानान्विना न कोऽपि अनिर्वाच्याविद्यां अनुभवति अनाद्यनिर्वाच्याविद्याया अनिर्वचनीयवस्तुभूतत्वात् ज्ञानबाध्यत्वं न संभवति ।

(2) सर्वे जनास्सुषुप्तिमनुभूय पुनः जाग्रदवस्थां प्राप्य "न किंचिदवेदिष्म" "सुखमहमस्वात्सामम्" इति वदन्ति । श्रुतिर्वदति "पश्यन्वै न पश्यति" "न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तंयत्पश्येत्" इति । तस्यार्थः– सुषुप्तौ अहं दर्शनशक्तिमान् अस्मि किन्तु द्वितीयस्य दृश्यस्य अभावात् न पश्यामि इति ।

वाचस्पतिमिश्राः सुषुप्तौ लयलक्षणाविद्या, लयविक्षेपसंस्कारौ च वर्तन्ते इति वदन्ति ।

स ॥ इदन्तु सर्वानुभवविरुद्धम् ।

# शुद्धं ब्रह्म जगत्कारणमित्यस्य विरुद्धवाक्यानि

पु. 48 1-1-2

(1) भा ॥ शुद्धब्रह्मणोजगत्कारणत्वबोधकभाष्यवाक्यानि—अस्य जगतः नामरूपाभ्यां व्याकृतस्य . . . . . . . जन्मस्थितिभङ्गं यस्मात्सर्वज्ञात् सर्वशक्तेः कारणाद्भवति तद्ब्रह्म । सर्वश्चासौ-ज्ञश्च—सर्वज्ञः सर्वा च सा शक्तिश्च—सर्वशक्तिः तस्याः सर्वशक्तेः शक्तिः—-परब्रह्मैव शक्तिशक्तिमतोरभेदादि-त्युक्तेः ।

पु. 783 3-4-2

(2) भा ॥ तत्र प्रसाधितं एतदधिकं असंसारि ब्रह्म जगत्कारणम् । तदेव च संसारिणः आत्मनः पारमार्थिकं स्वरूपं उपनिषत्सु उपदिश्यते इति ।

पु. 373 2-1-14

(3) भा ॥ कार्यमाकाशादिकं बहु प्रपंचं जगत् । कारणं परं ब्रह्म ।

पु. 345 2-1-1

(4) प्रथमे अध्याये सर्वज्ञस्सर्वेश्वरो जगत उत्पत्तिकारणं मृत्सुवर्णादयइव घटरुचकादीनां, उत्पन्नस्य जगतो नियन्तृ-त्वेन स्थितिकारणं मायावीव मायायाः, प्रसारितस्य जगतः पुनः स्वात्मन्येवोपसंहारकारणं अवनिरिव चतुर्विधस्य

भूतग्रामस्य, स एव च नस्सर्वेषामात्मा इत्येतद्वेदान्तवाक्य-समन्वयप्रतिपादनेन प्रतिपादितम् ।

स ॥ अत्र केचन अथातो ब्रह्मजिज्ञासा, जन्माद्यस्य यतः इत्यत्र शुद्धं ब्रह्म सगुणं ब्रह्म द्वे अपि गृहीते इति वदन्ति । तन्नसंभवति । कुतः एतदधिकमसंसारि ब्रह्म जगत्कारणं तदेव च संसारिण आत्मनः पारमार्थिकं स्वरूपमित्युक्तत्वात्, स एव च नस्सर्वेषां आत्मेत्युक्तत्वाच्च । न हि सगुणं ब्रह्म सर्वेषामात्मा भवति । तस्मान्निर्गुणं शुद्धं ब्रह्मैव जगत्कारण-मिति सिद्धम् ।

वाचस्पतिमिश्रास्तु—

पु. 100 1-1-14

(1) अनाद्यनिर्वचनीयाविद्याशक्तिमच्चेतनोपादानं जगदागमिक-मिति ब्रह्मविदः ।

पु. 103 1-1-5

(2) अनाद्यनिर्वाच्याविद्यासचिवं ब्रह्म जगदुपादानकारणम् ।

स ॥ मं ॥ अनिर्वाच्याविद्याद्वितयसचिवं ब्रह्म कारणम् । एतेषु स्थलेषु अनाद्यनिर्वाच्याविद्यासचिवस्य ब्रह्मणः जगत्कारणत्वमूचुः भाष्यानुसारेण निर्विकारिब्रह्मणः जगत्कारणत्वं कथमिति चेत् श्रुणु अध्यासरूपाविद्यया निर्विकारिब्रह्मणि कल्पितं जगत् । कल्पितवस्तुनः कल्पनास्पदं यत् तदेवकारणम्

आस्पदाभावे कल्पनैव न संभवति, अतो जगत्कल्पनास्पद-भूतं ब्रह्म जगत्कारणमित्युच्यते ।

वाचस्पतिमिश्रमते अनाद्यनिर्वाच्याविद्या जगद्रूपेण परिणमते । तद्द्वारा ब्रह्मकारणमिति वक्तव्यम् । श्रुतौ आनन्दाद्ध्येव खलु इमानि भूतानि जायन्ते इति साक्षाच्छुद्धं ब्रह्मैव कारणमित्युक्तम् । तस्मादनाद्यनिर्वाच्याविद्याद्वारा ब्रह्म-कारणमित्येतत् श्रुतिविरुद्धं भाष्यविरुद्धं च ।

## स्वप्रक्रियाविरुद्धत्वेन प्रतिपादनम् ।

चतुश्शास्त्रपण्डिताः, सरस्वत्यवतारभूता इति प्रसिद्धाः, वाचस्पतिमिश्राः स्वप्रक्रियाविरुद्धत्वेन भाष्यकारप्रक्रियामनुसस्रुरित्येतन्महदाश्चर्यकरम् ।

पु 2-1-14

भाष्यकाराणां प्रक्रिया—

(1) भा ॥ अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य माया, शक्तिः, प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते ।

2-1-27

(2) भा ॥ अविद्याकल्पितेन नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादि सर्वव्यवहारास्पदत्वं प्रतिपद्यते ।

2-1-31

(3) भा ॥ प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणः सर्वशक्तियोगस्संभवतीत्येतदपि अविद्याकल्पितरूपभेदोपन्यासेनेत्युक्तमेव ।

3-2-2

(4) भा ॥ तत्र कल्पितरूपप्रत्याख्यानेन ब्रह्मणः स्वरूपावेदनमिति निर्णीयते ।

एषु स्थलेषु नामरूपात्मकप्रपञ्चबीजभूता या माया, सा अध्यासात्मकाविद्याकल्पितेत्युक्तम् । अध्यासरूपाविद्याकल्पिता माया जगत्कारणमित्युक्तम् । ब्रह्मकारणमित्यस्य अविद्यया ब्रह्मणि कल्पितं जगदित्यर्थः ।

वाचस्पतिमिश्राणां प्रक्रियानुसारेण—

अनिर्वाच्याविद्या अनादिभूता । अध्यासरूपाविद्या अनिर्वाच्यानाद्यविद्याकार्या । अनिर्वाच्याविद्या माया एकैव तथा च मयाकार्या अध्यासरूपाविद्या इत्यर्थः ।

भाष्यकाररीत्या अध्यासरूपाविद्याकल्पिता माया ।

वाचस्पतिमिश्ररीत्या मायाकार्याध्यासरूपाविद्या ।

पु. 419 2-2-2

वा ॥ कारणभूतया लयलक्षणयाविद्यया प्राक्सर्गोपचितेन च विक्षेपसंस्कारेण यत्प्रत्युपस्थापितं नामरूपं तदेव माया तदावेशेनास्य चोद्यस्य प्रत्युक्तत्वात् । अत्र लयलक्षणयाविद्यया प्रत्युपस्थापितं नामरूपं, तदेवमायेत्युक्तम् ।

स ॥ स्वप्रक्रियानुसारेण मायाकार्याध्यासरूपाविद्या । भाष्यकारप्रक्रियानुसारेण अध्यासरूपाविद्याकल्पिता माया । इदानीं वाचस्पतिमिश्रैरपि अविद्याप्रत्युपस्थापिता माया इत्युक्तम् । अत्रस्थाविद्या-

शब्देन अध्यासरूपाविद्यैव वक्तव्या, अनाद्यनिर्वाच्याविद्यार्थकत्वे अनाद्यनिर्वाच्याविद्याप्रत्युपस्थापिता माया इत्यर्थो भवति अनिर्वाच्या-विद्यामाययोरेकत्वात् प्रत्युपस्थापिका प्रत्युपस्थापिताच एकैवेति अनिष्टार्थस्स्यात् ? अतोऽत्रस्थाविद्यापदस्य अध्यासरूपाविद्यार्थकत्वमेव समंजसं भवति । तथाच अध्यासरूपाविद्याप्रत्युपस्थापिता माया, इति समंजसार्थो भवति । वाचस्पतिमिश्रानुसारेण विरोध एव भवति ।

## सुषुप्त्यनुभवविरुद्धवाक्ये ।

सर्वोजनः सुषुप्तिमनुभूय पुनः जाग्रदवस्थां प्राप्य "न किंचिदवेदिषम् । सुखमहमस्वाप्समि "ति वदति ।

4-3-23

बृ ॥ सुषुप्तौ 'यद्वैतन्नपश्यति, पश्यन् वै तन्न पश्यति इति । न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदिति ' च वदति ।

स ॥ आत्मा सुषुप्तौ पश्यन् अस्ति । दर्शनदक्षोऽस्ति किञ्चिदपि दृश्यं नास्ति, अतो न पश्यति इति श्रुत्यर्थः ।

पु. 32 1-4-18

वा ॥ आत्मनो यतो निस्संबोधोऽतः स्वच्छतारूपमिवरूपमस्येति स्वच्छतारूपो न तु स्वच्छतैव । लयविक्षेपसंस्कारयोस्तत्र भावात् ।

पु. 228 1-3-15

कर्मविक्षेपसंस्कारसहितलयलक्षणाविद्यावशेषतासाम्येन स्वापप्रलयावस्थयोरभेद इति द्रष्टव्यम् ।

स ॥ सुषुप्तौ न कोऽपि किंचिदपि आत्मानं विना अनुभवतीति सर्वजनानुभवसिद्धम् ।

तद्विरुद्धतया तत्र लयविक्षेपसंस्कारौ लयलक्षणाविद्या च वर्तन्ते इत्युक्तिः सर्वानुभवविरुद्धा ।

यदि सुषुप्तौ लयविक्षेपसंस्कारौ लयलक्षणाविद्या च भवेयुः ताः आत्मा पश्येदेव न तु पश्यति, दर्शनसमर्थोऽपि द्वितीयाभावात् न पश्यति । अतस्ता न विद्यन्त इत्यर्थः । वाचस्पतिमिश्रप्रक्रियानुसारेण तु लयलक्षणाविद्या लयविक्षेप-संस्कारौ सुषुप्तौ वर्तन्त इत्येतत् सर्वानुभवविरुद्धम् ।

# सुषुप्तिविषयकभाष्यवाक्यविरुद्धवाक्यानि

पु. 102 1-3-15

(1) मू. भा ॥ सुषुप्तौ जीवः परेण ब्रह्मणा एकतां गच्छति—इत्यत्र भाष्यवाक्यानि ।

पु. 351 3-2-7 मू. भा.

(1) सता सोम्य तदा संपन्नो भवति ।

पु. 102 1-3-15

(2) मू. भा ॥ लोकेऽपि किल गाढं सुषुप्तमाचक्षते ब्रह्मीभूतो ब्रह्मतांगत इति ॥

पु. 143 1-3-42

पु. 608-4-3-21

(3) मू. भा ॥ सुषुप्तौ तावदयं पुरुषः प्राज्ञेनात्मना

संपरिष्वक्तः न बाह्यं किंचनवेद नान्तरम् । बृ ॥

पु. 289 2-1-6

(4) मू. भा ॥ संप्रसादे च प्रपंचपरित्यागेन सदात्मना सत्संपत्तेः निष्प्रपञ्चसदात्मत्वम् ॥

पु. 281 2-3-18

(5) मू. भा ॥ सुषुप्तं प्रकृत्य यद्वै तन्नपश्यति पश्यन्वै तन्नपश्यति, नहि द्रष्टुर्दृष्टेः विपरिलोपो विद्यते अविनाशित्वात् न तु तद्द्वितीयमस्ति यद्विभक्तं पश्येत् ।

पु. 349 3-2-7

(6) मू. भा ॥ नाडीद्वारेणैव ब्रह्मण्येवावतिष्ठत इति प्रतीयते ।

पु. 609 4-3-21

(7) बृ ॥ अविद्याया अभावात् आत्मकामम् ।

पु. 634 6-4-34

(8) बृ ॥ संप्रसादस्थानं मोक्षदृष्टान्तम् ।

पु. 367 6-2-3

(9) छां ॥ यस्माच्चैवं आत्मनः सद्रूपतामज्ञात्वैव सत्संपद्यन्ते तस्मात्सत्प्रविष्टा अपि तत्तद्भावेनैव पुनराविर्भवन्ति ।

पु. 356 6-8-1

(10) छां ॥ सुषुप्ते एव स्वं देवतारूपं जीवत्वविनिर्मुक्तं दर्शयिष्यामि ।

एतानि भाष्यवाक्यानि सुषुप्तौ सर्व आत्मरूपमापन्नो भवतीति प्रतिपादयन्ति ।

## श्री वाचस्पतिमिश्राणां सुषुप्तिविषयकभाष्यवाक्य-विरुद्धवाक्ये

---

पु. 327, 328 1-3-15

वा ॥ स्वच्छतारूपमिव रूपं अस्येति स्वच्छतारूपः । न तु स्वच्छतैव लयविक्षेपसंस्कारयोस्तत्रभावात् । समुदाचरद्वृत्ति-विक्षेपाभावमात्रेणोपमानम् ।

पु. 228 1-3-15

वा ॥ कर्मविक्षेपसंस्कारसहितलयलक्षणाविद्यावशेषतासाम्येन स्वाप-प्रलयावस्थयोरभेद इति द्रष्टव्यम् ।

स ॥ भाष्यवाक्यैरज्ञातब्रह्मैव सुप्तिस्थानम् इति । वाचस्पतिमिश्रै-स्तद्विरुद्धतया सुषुप्तौ लयविक्षेपसंस्कारौ लयलक्षणाविद्या च वर्तन्त इति उक्तम् । पुनस्स्वोक्तिविरुद्धतया ब्रह्मात्मत्वमुक्तम् तथाहि ।

पु. 634, 635

तथाच सिद्धमस्य ब्रह्मात्मत्वमित्यर्थः । ब्रह्मभूयप्रतिपादने किञ्चित्प्रयोजनमस्ति, उपाधिलये जीवस्यान्यत्र स्थित्ययोगात् ब्रह्मण्येव स्वाप आस्थेय इत्यर्थः ।

पु. 328 1–3–15

स्वापकलेहि सर्वे एव विद्वानविद्वांश्च जीवलोकः हृत्पुंडरीकाश्रयं दहराकाशाख्यं ब्रह्मलोकं प्राप्नोऽपि इत्यनेनं सर्वेषां स्वापकाले ब्रह्मप्राप्तिरुक्ता पुनस्तत्रैव तद्विरुद्धतया "अनाद्यविद्यातमःपटलदृष्टित्वाद्ब्रह्मभूयमापन्नोऽहमिति न वेद।" ब्रह्मभूयमापन्नोऽपि इत्यनेन ब्रह्मभावमापन्नत्वमुक्त्वा तदज्ञाने अविद्यातमःपटलदृष्टित्वमुक्तम् ।

स ॥ ब्रह्मभूयमापन्नस्य अविद्यातमःपटलदृष्टित्वं कथम् ?

जीवलोकः हृत्पुंडरीकाश्रयं दहराकाशाख्यं ब्रह्मलोकं प्राप्नोऽपि इत्यनेन सुषुप्तौ सर्वेषां ब्रह्मप्राप्तिरुक्ता ।

तत्त्वज्ञानानन्तरकर्तव्याभावप्रतिपादकवाक्यविरुद्धत्वेन
कर्तव्यं वदन्ति वाचस्पतिमिश्राः ।

---

पु. 473 4-1-13

मू. भा ॥ पूर्वसिद्धकर्तृत्वभोक्तृत्वविपरीतं हि त्रिष्वपि कालेषु अकर्तृत्वाभोक्तृत्वस्वरूपं ब्रह्माहमस्मि नेतः पूर्वमपि कर्ता भोक्ता वाहमासं नेदानीं नापि भविष्यत्काल इति ब्रह्मविदवगच्छति ।

स ॥ कर्तृत्वाभावज्ञाने कार्यं कथं भवति ?

पु. 213 1-3-8

वा ॥ आगमाचार्येभ्यस्सत्यस्य श्रवणं आगमाविरोधिन्यायनिवेशनं—मननं मत्वाच गुरुशिष्यसब्रह्मचारिभिरनसूयुभिस्सह संवाय तत्त्वं श्रद्धत्ते, श्रद्धानन्तरं विषयान्तरादर्शी विरक्तस्ततोव्यावृत्तः **तत्त्वज्ञानाभ्यासं करोति** । सेयमस्य कृतिः प्रयत्नः अथ तत्त्वज्ञानाभ्यासनिष्ठा भवति यदनन्तरमेव तत्त्वविज्ञानं अनुभवः ।

स ॥ ज्ञाने जाते कर्तृत्वाभावज्ञाने विद्यमाने कथं ज्ञानाभ्यासं करोति ।

पु. 15 3-1-1

भा ॥ निःश्रेयसफलं तु ब्रह्मविज्ञानम् । नानुष्ठानान्तरापेक्षम् ।

वा ॥ शब्दज्ञानाभ्यासान्नानुष्ठानान्तरमपेक्षते । अत्रापि ज्ञानाभ्यासमपेक्षते ब्रह्मविज्ञानमित्युक्तम् ब्रह्मविज्ञानानन्तरं कर्तृत्वाभावज्ञाने सति कथं ज्ञानाभ्यासं करोति ?

पु. 94 1-1-4

वा ॥ न ज्ञानमात्रं सांसारिकधर्मनिवृत्तिकारणं अपि तु साक्षात्कारपर्यन्तं । ब्रह्मसाक्षात्कारश्च अन्तःकरणवृत्तिभेदः, श्रवणमननादिजनितसंस्कारसचिवमनोजन्मा षड्जादिभेदसाक्षात्कारश्च गान्धर्वशास्त्रश्रवणाभ्याससंस्कृतमनोयोनिः, सः निखिलप्रपंचमहेन्द्रजालसाक्षात्कारं समूलमुन्मूलयन् आत्मानमपि प्रपञ्चत्वाविशेषात् उन्मूलयति ।

स ॥ " ब्रह्मवेद ब्रह्मैव भवति " इति श्रुतिः " अवगतिपर्यन्त–ज्ञानमात्रादेवब्रह्मप्राप्तिं वदति तद्विरुद्धमिदमिति ज्ञेयम् ।

## अन्ये दोषाः

---

अनिर्वाच्याविद्यावादे एते दोषा अपरिहार्याः ।

(1) सृष्टेः पूर्वं आत्मैकत्वबोधकश्रुतीनां अनाद्यनिर्वाच्याविद्यांगीकारे विरोधोऽपरिहार्यः ।

(2) अनिर्वचनीयवस्तुभूताया अनाद्यनिर्वाच्याविद्यायाः ज्ञानबाध्यत्वाभावः । द्वैतापत्तिश्च ।

(3) अनाद्यनिर्वाच्याविद्याया ज्ञानबाध्यत्वांगीकारेऽपि इदानीं द्वैतं तस्या बाधानन्तरमद्वैतमिति स्यात् ।

(4) प्रस्थानत्रयभाष्ये कुत्रापि अनिर्वाच्याविद्या नोक्ता न सूचिता च ।

(5) अनिर्वाच्याविद्या पञ्चपादिकाकारोक्तमाया एकैव ।

(6) भाष्यकारा अविद्याकल्पितां मायामाहुः ।

(7) वाचस्पतिमिश्रा मायाकार्यामविद्यामाहुः ।

(8) अनाद्यनिर्वाच्याविद्या " अहं अनिर्वाच्याविद्येति " वक्तुं न शक्ता, जडत्वात् ।

अध्यस्तात्मैव " इयं अनिर्वाच्याविद्येतिवक्तुं शक्नोति अतोऽध्यस्ता माया न अनादिभूता । इति ज्ञायते ।

(9) भाष्यकारा अध्यासस्य अनादित्वं ऊचुः वाचस्पतिमिश्राः अध्यासं अनाद्यनिर्वाच्याविद्याकार्यमित्याहुः

(10) भाष्यकाराः ज्ञानं ज्ञापकं न कारकं, ज्ञानं न वस्तुनुत् इति वदन्ति ।

वाचस्पतिमिश्राः अनिर्वचनीयवस्तुभूतापि अनाद्यनिर्वाच्याविद्या ज्ञानबाध्येत्याहुः

(11) भाष्यकारा जीवस्सुषुप्तौ जीवत्वविनिर्मुक्तं स्वं देवतारूपं अप्येतीति वदन्ति ।

वाचस्पतिमिश्राः सुषुप्तौ लयविक्षेपसंस्कारौ लयलक्षणाविद्या जीवश्च वर्तन्त इत्याहुः

पु. 297 1–4–3

भा ॥ यदि वयं स्वतन्त्रां कांचित्प्रागवस्थां जगतः कारणत्वेनाभ्युपगच्छेम प्रसञ्जयेम तदा प्रधानकारणवादम् । परमेश्वराधीनात्वियमस्माभिः प्रागवस्था जगतोऽभ्युपगम्यते न स्वतन्त्रा । सा चावश्याभ्युपगन्तव्या । अर्थवती हि सा । न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिद्धयति । कुतः । विद्यया तस्या बीजशक्तेर्दाहात् । **अविद्यात्मिका हि बीजशक्तिः** अव्यक्तशब्दनिर्देश्या । परमेश्वराश्रया मायामयी महासुप्तिः, यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः ।

वा ॥ यदि ब्रह्मणोऽविद्याशक्त्या संसारः प्रतीयते हन्त मुक्तानामपि पुनरुत्पादप्रसंगः, तस्याः प्रधानवत्तादवस्थ्यात् । तद्विनाशे वा समस्तसंसारोच्छेदः तन्मूलाविद्याशक्तेः समुच्छेदादित्यत अह—मुक्तानां च पुनर्बन्धस्य अनुपपत्तिः । कुतः । विद्यया तस्या बीजशक्तेर्दाहात् । अयमभिसंधिः ।— न वयं प्रधानवदविद्यां सर्वजीवेष्वेकामाचक्ष्महे येनैदमुपालभ्येमहि, किन्त्वियं प्रतिजीवं भिद्यते तेन यस्यैव विद्योत्पन्ना तस्यैवाविद्या अपनीयते न जीवान्तरस्य ।

स ॥ तच्छब्दस्य सर्वनाम्नः पूर्वपरामर्शकत्वं वा प्रसिद्धार्थकत्वं वा वक्तव्यम् । पूर्वपरामृष्टस्तु संसारः तस्य मूलभूताविद्याशक्तिस्तु मूलाविद्याशक्तिरेव । सा च प्रतिजीवं भिद्यते इत्युक्तत्वात् मूलाविद्या अथवा मूलाविद्याशक्तिरनन्ता इत्युक्तं भवति ।

अविद्यायाः अथवा अविद्याशक्तेर्नानात्वांगीकारे कस्यापि केवलात्मज्ञानं नोत्पद्यते । तथाहि । अविद्या वा अविद्याशक्तिर्वा अध्यासकल्पितेति नांगीकृता, प्रत्युताध्यासस्योपादानकारणीभूतेत्यंगीकृता, तेषु अनेकजीवेषु तेषामुपाधिभूतासु अनेकाविद्यासु अथवा अनेकाविद्याशक्तिषु सतीषु कथं कस्यापि केवलात्मज्ञानं संभवति ? केवलात्मज्ञानाभावे मोक्षाशा स्वप्नेऽपि दुर्लभा । तस्मादियं प्रक्रिया न समीचीना ।

अध्यासकल्पिता मायेत्युक्ते यदा तत्त्वज्ञानेन अध्यसो बाध्यते तत्कल्पितास्सर्वेऽपि तदैव बाध्यन्ते । वाचस्पति-मिश्रास्तु मायाकार्योऽध्यास इति अंगीकुर्वन्ति तथाच अनिर्वाच्याविद्याः तच्छक्तयश्च नाध्यासकल्पिताः अनिर्वच-नीयवस्तुभूताः तस्मान्न ज्ञानबाध्या भवन्ति । द्वैतापत्ति-र्दुर्निवार्या । तस्मादियं प्रक्रिया दूरतस्त्याज्या । अध्यास-प्रक्रियैव ग्राह्या ।

पु. 232 1-3-19

भा ॥ आविर्भूतस्वरूपो जीवो विवक्ष्यते ।

वा ॥ पौर्वापर्यालोचनया तावदुपनिषदां शुद्धबुद्धमुक्तमेकमप्रपञ्चं ब्रह्म, तदतिरिक्तं च सर्वं तद्विवर्तो रज्ज्वोरिव भुजङ्गः इत्यत्र तात्पर्यमवगम्यते ।

स ॥ रज्ज्वोरिव भुजङ्ग इत्यत्र भाष्यकारमते तत्र भुजङ्गो नास्ति केवलभुजङ्गवदवभासते इत्यर्थः वाचस्पतिमिश्रमते अत्र प्रातिभासिकसत्ताविशिष्टो भुजङ्गोऽनिर्वाच्याविद्यापरिणाम-भूतो वर्तते । स च रज्जुज्ञानेन बाध्यते इत्यर्थः वाचस्पतिमिश्राः परमात्मनः पारमार्थिकसत्ता, प्रपञ्चस्य व्यावहारिकसत्ता, रज्जुसर्पस्य प्रातिभासिकसत्ता इति सत्तात्रयं भाष्यविरुद्धमंगीकुर्वन्ति ।

13-26

गी. भा ॥ क्षेत्रं च मायानिर्मितहस्तिहर्म्यादिवत्, स्वप्नदृष्टवस्तुवत्, गन्धर्वनगरादिवत् असदेव सदिवावभासते ।

स ॥ अत्रोक्तक्षेत्रस्य व्यावहारिकसत्ता वर्तते किम्? नास्ति । अतः सत्तात्रैविध्यं भाष्यविरुद्धम् ।

पु. 203 2-1-16

स ॥ भाष्यकारैरेकं च सत्त्वमित्युक्तम् । व्यावहारिकसत्ताविशिष्टस्य प्रपञ्चस्य व्यवहारकाले ज्ञानबाध्यत्वं कथम् ।

श्री वाचस्पतिमिश्राः अनेकार्थस्य अन्याय्यत्वादिति वदन्ति विरुद्धानेकार्थं वदन्ति । तथाहि

---

पु. 99 1-1-4

(1) साक्षात्कारो भाविकः नासौकार्यः तस्यब्रह्मस्वरूपत्वात् ।

पु. 277 2-1-14

(2) यस्तु ब्रह्मस्वभावस्साक्षात्कारोऽसौ न कार्यः तत्स्वभावत्वात् ।

पु. 30 1-1-1

(3) ब्रह्मसाक्षात्काराय मोक्षापरनाम्ने कल्पते । ब्रह्मसाक्षात्कारस्य स्वभावत्वेन नित्यत्वादकार्यत्वात् । यस्तु साक्षात्कारो भाविकः नासौ कार्यः ।

पु. 31 1-1-1

(4) ब्रह्मसाक्षात्कारस्य स्वभावत्वेन नित्यत्वात् ।

स ॥ एतैर्वाक्यै स्साक्षात्कारस्य ब्रह्मस्वभावत्वमुक्तम् । अन्येषु स्थलेषु अन्तःकरणवृत्तिरूपत्वं जन्यत्वं वदन्ति तथाहि

पु. 31 1-1-1

(1) साक्षात्कारोऽन्तःकरणस्यैव वृत्तिभेदः

पु. 41 1-1-1

(2) अविद्यानिवृत्तिस्तु उपासनाकार्यादन्तःकरणवृत्तिभेदात्साक्षात्कारादिति द्रष्टव्यम् ।

पु. 31 1-1-1

(4) ब्रह्मोपासनायाः ब्रह्मसाक्षात्कारः कार्यमभ्युपेयः ।

पु 9. 1-1-4

(5) ब्रह्मसाक्षात्कारोऽवगतिः । स च साक्षात्कारो वृत्तिरूपः ।

पु. 429 2-2-10

(6) यदा साक्षात्कार उपजायते ।

पु. 94 1-1-4

(7) ब्रह्मसाक्षात्कारश्चान्तःकरणवृत्तिभेदः श्रवणमननादि जनितसंस्कारसचिवमनोजन्मा, षड्जादिभेदसाक्षात्कार इव गान्धर्वशास्त्रश्रवणाभ्याससंस्कृतयोनिः, स च निखिलप्रपञ्चमहेन्द्रजालसाक्षात्कारं समूलमुन्मूलयन् आत्मानमपि प्रपञ्चत्वाविशेषादुन्मूलयति ।

पु. 222 1-3-14

(8) साक्षात्कारो विज्ञानम् । विशिष्टं हि तज्ज्ञानं पूर्वेभ्यः ।

पु. 333 1-4-22

(9) साक्षात्कारेण विद्यया

पु. 52 1–1–1

(10) अनुभवोऽन्तःकरणवृत्तिभेदो ब्रह्मसाक्षात्कारः

स ॥ एतेषु स्थलेषु साक्षात्कारशब्दः
अन्तःकरणवृत्तिरूपार्थकत्वेनोपयुक्तः । पूर्वं ब्रह्मस्वरूपार्थकत्वेनोपयुक्तः ।

## भाष्यकारैरुपयुक्ताः केचनशब्दाः

### वाचस्पतिमिश्रैः भाष्यकारैरुक्तार्थविरुद्धार्थकत्वेन उपयुक्ताः—तथाहि

---

भा ॥ मिथ्याज्ञानम्—अध्यासः

अध्यासभाष्य

वा ॥ (1) मिथ्या—अनिर्वचनीयतावचनः

अज्ञानं—अनिर्वचनीयवस्तु, जगदुपादानकारणभूतम् ।

(2) निमित्तः—उपादानम्

अनिर्वचनीयवस्तूपादानं जगत् ।

(3) मिथ्याज्ञानं अध्यासः अयं भाष्यसंमतः ।

मा. का. पु. 23 2–31

(1) भा ॥ **माया** असद्वस्त्वात्मिका सद्वस्त्वात्मिकेव अवभासमाना ।

(2) या, मा नास्ति, सा माया ।

पु. 201 2–1–14

भा ॥ अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये प्रपञ्चबीजभूते . . . . माया, शक्ति, प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते ।

पु. 213 2–1–27

भा ।। अविद्याकल्पितेन नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते ।

पु. 215 2–1–29

भा ।। ब्रह्मणस्सर्वशक्तियोगस्संभवतीत्येदपि अविद्याकल्पितरूप-भेदोपन्यासेनेत्युक्तमेव ।

पु. 365 3–2–22

भा ।। कल्पितरूपप्रत्याख्यानेन ब्रह्मणः स्वरूपावेदनमिदमिति निश्चीयते ।

वा ।। मंगलश्लोके—अनाद्यनिर्वाच्याविद्या अनिर्वाच्यवस्तुभूत प्रपञ्चबीजभूता, अध्यासस्यापि उपादानकरणीभूता, माया अथवा अनिर्वाच्याविद्या ज्ञानबाध्या, माया ब्रह्माश्रिता इत्यादिः ।

भा ।। अध्यासः अनादिः

अध्यासभाष्य

वा ।। अध्यासः—मायाकार्यम् ।

भा ।। तमः अज्ञानम्

वा ।। तमः अज्ञानं, अनिर्वाच्यानाद्यविद्या च ।

पु. 349 2–41

वा ॥ श्रीवाचस्पतिमिश्राः “न च विकल्पो वस्तुनि।” “सिद्धे तदनुपपत्तेः”। इति वदन्ति। पुनःस्वोक्तिविरुद्धतया वस्तु विकल्पयन्ति। तथा हि।

पु. 17 1–1–1

सत्यं प्रत्यगात्मा स्वयं प्रकाशत्वादनंशत्वादविषयः।

स ॥ ब्रह्मणोऽविषयत्वमुक्त्वा पुनः एतद्विरुद्धतया विषयत्वमुक्तम्।

पु. 31 1–1–1

अपितु अन्तःकरणस्यैव वृत्तिभेदः ब्रह्मविषयः इति ब्रह्मणः विषयत्वमुक्तम्।

पु. 41 1–1–1

भवतु ब्रह्मविषयावगतिः। अत्रापि ब्रह्मणोऽवगतिविषयत्व-मुक्तम्।

## जीवस्वरूपविषये विरुद्धविकल्पः ।

पु. 375, 376 2-1-14

ब्रह्मणो जीवभावः न काल्पनिकः किन्तु भाविकः अंशोहि सः तस्य कर्मसहितेन ज्ञानेन ब्रह्मभावः आधीयते । इत्यत आह स्वयंसिद्ध इति ।

स ।। अत्र जीवभावस्य कल्पितत्वं निषिध्य भाविकत्वमुक्तम् ।

पु. 327 1-4-22

तस्मादनिर्वाच्याविद्यापरिकल्पित एव अंशः न भाविकः

स ।। अत्र भाविकत्वं निषिध्य परिकल्पितत्वमुक्तम् ।

पु. 659 3-2-29

तस्मादनाद्यविद्याविक्रीडितमेव एकस्यात्मनो जीवभावभेदो न भाविकः । तथा च तत्त्वज्ञानादविद्यानिवृत्तौ अपवर्गसिद्धिः ।

स ।। अत्र न भाविकः किन्तु अनाद्यविद्याविक्रीडितमित्युक्तम् ।

# जीवस्वरूपवर्णने विरुद्धविकल्पः

पु. 333 1-4-22

भा ॥ अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेनावस्थानादुपपन्नमिद मभेदेनोपक्रमणम् । काशकृत्स्नीयं मतं श्रुत्यनुसारीति गम्यते ।

बा ॥ आत्यन्तिकेहि जीवपरमात्मनोरभेदे तात्त्विके अनाद्य-विद्योपाधिकल्पितो भेद 'तत्त्वमसीति' जीवात्मनो ब्रह्म-भावतत्त्वोपदेशश्रवणमननादिध्यानप्रकर्षपर्यन्तजन्मना साक्षा-त्कारेण विद्यया शक्यः समूलकाषं कषितुं रज्ज्वामहिविभ्रम इव रज्जुतत्त्वसाक्षात्कारेण ।

स ॥ अनाद्यविद्योपाधिपरिकल्पितो भेदः इत्यस्य अनाद्यध्यास-परिकल्पितो भेदः इति एकोऽर्थः अनाद्यनिर्वाच्याविद्या-परिणाम इति अन्योऽर्थः । अनाद्यनिर्वाच्याविद्या-परिणामभूतः कथं ज्ञानेन बाध्यते ?
इति कल्पितः । तेषां प्रक्रियानुसारेण अनाद्यनिर्वाच्या-विद्यापरिणतो भेदो विद्यया कथं बाध्यते ?

पु 337 1-4-23

अविद्यापरिकल्पित एवांशो न भाविकः ।

पु. 337 1–4–22

अनाद्यविद्यापरिकल्पित एवांशो न **भाविकः**

375 2–1–14

ब्रह्मणो जीवभावः न काल्पनिकः किन्तु **भाविकः**

375 2–1–14

अंशोहि सः तस्य कर्मसहितेन ज्ञानेन ब्रह्मभावः आधीयते ।

पु. 337

अनाद्यनिर्वाच्याविद्यया परिकल्पितो जीवः वस्तुतो न परमात्मनो भिद्यते ।

पु. 375, 76 2–1–14

(1) ब्रह्मणो जीवभावः न काल्पनिकः किन्तु भाविकः ।

पु. 337 1–4–23

(2) अविद्या परिकल्पित एवांशो न भाविकः ।

पु. 529 2–3–29

(3) बुद्ध्युपाधिकृतं जीवत्वम् ।

पु. 337 1–4–22

(4) अनाद्यनिर्वाच्याविद्यया परिकल्पितो जीवः । न भाविकः ।
एवं रीत्या वाचस्पतिमिश्राः जीवस्वरूपविषये एकस्मिन् स्थले भाविकत्वं, बहुषुस्थलेषु काल्पनिकत्वं, अन्यस्मिन्

स्थले बुद्ध्युपाधानकृतत्वं, एवमादिरीत्या . . . . . .
विकल्पयामासुः वाचस्पतिमिश्राः ।

पु. 429 4–1–10

सांख्यस्य सतस्तमसो ज्ञानबाध्यत्वाभावात् इति वदन्तो वाचस्पतिमिश्राः विद्यमानाया अनिर्वाच्याविद्याया ज्ञानबाध्यत्वं कथमवोचन् ?

पु. 94 1-1-9

भा ॥ न अवगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुं वेदप्रमाणजनितब्रह्मात्मभावविरोधात् ।

वा ॥ न ज्ञानमात्रं सांसारिकधर्मनिवृत्तिकारणम् ।

स ॥ ह्यात्मत्वज्ञानेन सांसारिकधर्मनिवृत्तिर्भवतीति भाष्यकाराः । ज्ञानमात्रेण सांसारिधर्मनिवृत्तिः न भवतीति वाचस्पतिमिश्राः ।

भो भोः नित्यानित्यविवेकशालिनः, विरक्ता मुमुक्षवः,

देहेन्द्रियादिषु अहं ममाभिमानरूपोऽध्यासः नैसर्गिकः सर्वलोकानुभूतः, देहेन्द्रियादयः अस्माभिर्भुक्तान्नरसपरिणामभूताः, आत्मातु नित्यः सर्वव्यापकः निरवयवः चेतनः, तयोर्जडचेतनयोर्विरुद्धस्वभावयोरेकत्वं सर्वथा न संभवति तथापि सर्वे जनाः देहादिषु आत्मत्वं अध्यस्य व्यवहरन्ति इत्येतत्सर्वजनानुभवसिद्धम् ।

ईदृशी भ्रान्तिरात्मैकत्वज्ञानेन बाध्यत इत्येतदपि वेदान्तविज्ञानविचक्षणैरनुभूतम् । मूलाविद्या वा, अनाद्यनिर्वाच्याविद्या वा जगत्कारणत्वेन पञ्चपादिकाकारादिभिर्व्याख्यातृभिर्विना न केनापि ज्ञाता । अनिर्वचनीयवस्तुभूता मूलाविद्या वा अनाद्यनिर्वाच्याविद्या वा ज्ञानबाध्या न भवति । मायायाः अथवानाद्यनिर्वाच्याविद्याया आत्मानात्मनोरितरेतराध्यासरूपभ्रान्तेरुपादानकारणत्वेन तैरंगीकृतत्वाद्भ्रान्तिकल्पिता मूलाविद्या अथवानाद्यनिर्वाच्याविद्या इति वक्तुं न शक्यते । अतो मूलाविद्या ज्ञानबाध्या न भवति ।

अनिर्वचनीयाविद्यावादे मायावादे च वस्तुभूता माया अनिर्वाच्याविद्या वा ज्ञानबाध्या न भवति । केवलात्मज्ञानस्य संभव एव नास्ति ।

अयि भो मुमुक्षवः, मूलाविद्यावादं वा अनाद्यनिर्वाच्याविद्यावादं वा परित्यज्य ।

श्री शङ्करभगवत्पादैरुक्तसर्वानुभवसिद्धाध्यासवादमाश्रित्य ब्रह्म विचारं कृत्वा "आत्मा च ब्रह्मे"त्यनुभवरूपज्ञानं लब्ध्वा ज्ञानेन अध्यासरूपाविद्यां बाधित्वा स्वस्वरूपावस्थानलक्षणं मोक्षं लब्ध्वा सुखिनो भवत इति नारयणं स्मरामि ।

मैसूरु
जम्बूर हौस
1-10-82

ज्ञानानन्देन्द्रसरस्वतीस्वामी

# शङ्कराचार्योक्तमायालक्षणम् ।

पु. 201 2-1-4

मू. भा ।। सर्वज्ञस्येश्वरस्यात्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य माया, शक्तिः, प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते ।

पु. 213 2-1-27

मू. भा ।। अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते ।

पु. 215 2-1-31

मू. भा ।। प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणः सर्वशक्तियोगस्संभवतीत्येतदप्यविद्याकल्पितरूपभेदोपन्यासेनेत्युक्तमेव ।

पु. 365 3-2-22

मू. भा ।। कल्पितरूपप्रत्याख्यानेन ब्रह्मणस्स्वरूपावेदनम् । इति निश्चीयते ।

पु. 20 2-31

मा.का. भा ॥ या असद्वस्त्वात्मिका सद्वस्त्वामिकेव अवभासमाना
सा माया ।

पु. 196 4–58

मां.का. भा ॥ या मा (नास्ति) सा माया ।

पु. 196

मां.का. भा ॥ मायेति अविद्यमानस्य आख्या ।

पु. 149 1–4–3

मू. भा ॥ अविद्यात्मिका हि बीजशक्तिः ।

पु. 201 2-1–14

मू.सू. भा ॥ अविद्याकृतनमरूपोपाध्यनुरोधी ईश्वरो भवति ।

पु. 356 3–2–11

मू. भा ॥ उपाधीनामविद्याप्रत्युपस्थापितत्वात् ।

स ॥ एभिर्वाक्यैर्मायाया अविद्याकल्पितत्वं स्पष्टमुक्तम् ।

पु. 429 2–2–10

श्रीवाचस्पतिमिश्राः "सांख्यस्य सतस्तमसो अशक्य-समुच्छेदात्" इति विद्यमानस्य वस्तुनः ज्ञानबाध्यत्वं न संभवतीति जानन्तोऽपि विद्यमानाया अनिर्वाच्याविद्यायाः

ज्ञानबाध्यत्वं कथं अंगीचक्रुः ? इयं अनिर्वाच्याविद्या अतो ज्ञानबाध्या इति चेत् न। अनिर्वाच्या वा भवतु निर्वाच्या वा भवतु विद्यमानवस्तुभूता इयमंगीकृता । वस्तुभूताया ज्ञानबाध्यत्वं नैव संभवति । किं च अनिर्वाच्याविद्या जगदुपादानकारणभूता, अग्रहणान्यथाग्रहणसंशयग्रहणानामपि उपादानकारणभूता, माया, अक्षरं अव्यक्तमित्यादिशब्दवाच्या, ज्ञानबाध्येति निर्वचनं कुर्वन्ति तथापि अनिर्वाच्याविद्येति वदन्ति, तस्याः कथं अनिर्वचनीयत्वं संभवति ? अनिर्वाच्याविद्या ब्रह्माश्रिता, ज्ञानं अन्तःकरणवृत्तिः । भिन्नाधिकरणस्थयोरतयोर्बाध्यबाधकत्वं कथम् ? तस्मादिमां प्रक्रियां दूरतो निरस्य अध्यासप्रक्रियामेवानुसरन्तुमुमुक्षवः ।

श्रीमद्वाचस्पतिमिश्रैरनिर्वाच्याविद्यालक्षणपरिष्कारः न कृतः, अध्यासस्य कार्याविद्यात्वमपि स्पष्टं कुत्रापि व्याख्याने नोक्तम्, तथापि अनिर्वाच्याविद्याद्वितयसचिवस्येति अविद्याद्वयस्योक्तत्वात्, तम इत्यनेनाविद्याद्वयस्याप्युक्तेः, अध्यासस्यानादित्वानुक्तेः मूलाविद्याप्रक्रियैव तैरनुसृतेति स्पष्टं ज्ञायते । अनिर्वाच्याविद्या, मूलाविद्या एकैवेतिमत्वा पञ्चपादिकाकारैर्विवरणकारैश्च मूलाविद्यालक्षणं यदुक्तं तदेवानाद्यनिर्वाच्याविद्यालक्षणमिति कृत्वा मूलाविद्यालक्षणं—पञ्चपादिकाकारैर्विवरणकारैश्च यदुक्तं तदेवात्र लिख्यते ।

पं ।। पु. 20

येयं श्रुतिस्मृतीतिहासपुराणेषु नामरूपं, अव्याकृतं, माया, अविद्या, प्रकृतिः, अव्यक्तम् अग्रहणं, तमः, कारणं, लयः, शक्तिः,

अक्षरम् इत्यादि च तत्र तत्र बहुधा गीयते। चैतन्यस्य स्वतएवावस्थितलक्षणब्रह्मस्वरूपतावभासं प्रतिबद्ध्य जीवत्वापादिका, विद्याकर्मपूर्वप्रज्ञासंस्कारचित्रभित्तिः सुषुप्ते प्रकाशाच्छादनविक्षेप-संस्कारमात्ररूपस्थितिः अनादिरविद्या ।

विवरण पु. 15

कार्यदर्शनोन्नेयं आवरणकृत्यं विपर्ययं च आत्मनि कुर्वत् अज्ञानं भावरूपं उभयकारणान्यथानुपपत्या च कल्प्यते ।

अध्यासवादस्य महिमानं अनिर्वाच्याविद्यावादस्य निस्सारत्वं च एतत्पुस्तकं पठतां मुमुक्षूणां सुखेन ज्ञातुं अनुकूलं भवेदिति मत्वा उभावपि वादौ संग्रहेण प्रदर्शयिष्यामि—

---

अध्यासवादः—

(1) अतस्मिन् तद्बुद्धिः—अध्यासः मुख्याविद्या ।

(2) अग्रहणसंशयग्रहणेऽपि अविद्ये ।

अनिर्वाच्याविद्यावादः—

(1) अनाद्यनिर्वाच्याविद्या अनिर्वचनीयवस्तुभूता मुख्याविद्या ।

(2) अध्यासः कार्याविद्या ।

अ. वा.

(3) अध्यासोऽनुभवसिद्धः न प्रमाणसिद्धः ।

अनि. वा.

(3) अनिर्वाच्याविद्या श्रुतिस्मृत्यनुमानप्रमाणसिद्धा ।

अ. वा.

(4) अनाद्यनन्तोप्यध्यासः ज्ञानेन बाध्यते ।

अनि. वा.

(4) वस्तुभूतापि अनिर्वाच्याविद्या ज्ञानेन बाध्यते ।

अ. वा.

(5) प्रतिपत्तिक्रमेण अध्यासस्य कारणं अग्रहणमेव ।

अनि. वा.

(5) अनिर्वाच्याविद्या अनादिभूता अतःतस्याः कारणं नास्ति ।

अ. वा.

(6) अध्यासः—अन्तःकरणस्य मिथ्यावृत्तिः । सम्यग्ज्ञानं अन्तःकरणस्य सम्यग्वृत्तिः उभयोरेकाधिकरणत्वात् उभयोः परस्परविरुद्धत्वात् मिथ्यावृत्तिः सम्यग्वृत्त्या-बाध्यते ।

अनि. वा.

(6) अनिर्वाच्याविद्याया ज्ञानबाध्यत्वांगीकारात् भिन्नाधिकरण-स्यापि बाध्यते । अनिर्वचनीयवस्तुभूतापि ज्ञानेन बाध्यते ।

अ. वा.

(7) सृष्टेः पूर्वं आत्मा एक एव आसीदित्युक्तिः अनात्मन-स्सर्वस्याध्यासकल्पितत्त्वात् ज्ञानबाध्यत्वाद्युज्यते ।

अनि. वा.

(7) अनाद्यनिर्वाच्याविद्या अनिर्वचनीयवस्तुभूतापि ज्ञानबाध्ये-त्यंगीकारात् बाध्यते । अतोऽद्वैकत्वस्य न विरोधः ।

अ. वा.

(8) ज्ञानसमकाल एवाज्ञाननिवृत्तिः, मोक्षप्राप्तिश्च युज्यते ।

अनि. वा.

(8) ज्ञानेनानिर्वाच्याविद्यानाशेऽपि अविद्यालेशस्य देहरूपेण-सत्वात् विदेहताकालीन एव मुख्यो मोक्षः ।

अ. वा.

(9) सुषुप्तौ जीवाः "अहं ब्रह्मास्मीति" अज्ञात्वा ब्रह्म प्रविशन्ति, अतस्तत्तद्रूपेणैव पुनरागच्छन्ति ।

अनि. वा.

(9) जीवाः सुषुप्तौ जीवरूपेणैव वर्तन्ते अतस्तत्तद्रूपेणा-गच्छन्ति ।

अ. वा.

(10) "अहं ब्रह्मास्मी"ति जाग्रदवस्थायां ज्ञात्वा प्रविशन्ति चेत् न पुनरागच्छन्ति । ब्रह्मरूपेणैव वर्तन्ते ।

अनि. वा.

(10) अनिर्वाच्याविद्यायाः अविद्यालेशस्य च ज्ञानेन बाधे सति देहपातान्तरं ब्रह्मस्वरूपा भवन्ति ।

अ. वा.

(11) तत्त्वज्ञानं मिथ्याज्ञानं बाधते इत्येतदिहैव दृष्टम् ।

अनि. वा.

(11) अनिर्वाच्यानाद्यविद्यापि ज्ञानेन बाध्यत इत्यंगीकुर्वन्ति ।

अ. वा.

(12) स्वप्नजागरयोरध्यासरूपाविद्या वर्तते प्रपञ्चोपि दृश्यते, सुषुप्तसमाध्योरध्यासो नास्ति प्रपञ्चोऽपि नास्ति। तस्मात् यत्सत्वे यत्सत्वं यद्भावे यद्भाव तत्तस्यकार्यं इति न्यायेन अध्यासकार्यं जगदिति निर्णीयते। प्रपञ्चकारणे अध्यासे ज्ञानेन बाधिते सति प्रपञ्चोऽपि बाधितो भवति कैवल्यं सिद्धं भवति।

अनि. वा.

(12) अनाद्यविद्यापरिणामभूतं जगत् अनाद्यविद्यायां बाधितायां जगदपि बाधितं भवति, किन्तु देहरूपेणाविद्यालेशो वर्तते। देहपातानन्तरमेव मुक्तो भवति।

अ. वा.

(13) शास्त्रयुक्त्यभ्यासः पूर्वरूपमेवात्मप्रतिपत्तेः।

अनि. वा.

पु. 213 l–38

(13) तत्त्वज्ञानाभ्यासंकरोति।

अ. वा.

(14) आत्मैवसुप्तिस्थानम्। प्राज्ञेनानात्मना संपरिष्वक्तः न बाह्यं किञ्चन वेद नान्तरम्।

अनि. वा.

(14) लयलक्षणाविद्या लयविक्षेपसंस्कारौ सुषुप्तौ वर्तन्ते।

अ. वा.

(15) ज्ञनं ज्ञापकम् न कारकम्, ज्ञानं न वस्तुनुत् ।

अनि. वा.

(15) ज्ञानं अनिर्वचनीयवस्तुनुत् ।

---

एषां वाचस्पतिमिश्राणां मते जगदुपादानकारणं अनिर्वाच्यानाद्यविद्या, तन्मूलकं ब्रह्म जगत्कारणं तेषां मते तदनन्यत्वाधिकरणन्यायेन अनाद्यनिर्वाच्याविद्यैव कारणभूतत्वात् सत्या, कार्यमाकाशादिकं अनृतं वाचारम्भणमात्रत्वादिति गम्यते। अनाद्यनिर्वाच्याविद्या न कार्यभूता। तस्याः अनादित्वेनाभ्युपगमात्। यदि सापि कार्या, कारणं परं ब्रह्म, इति अभ्युपगम्यते तदानीं ब्रह्मणः कारणत्वात् ब्रह्म सत्यम्, अनाद्यनिर्वाच्याविद्या अनृता कार्यत्वादित्युच्येत, नैव तथाभ्युपगता। अनिर्वाच्याविद्या अनादिभूता न कार्यभूता इति तेऽभ्युपगच्छन्ति। तस्मात् सैव सत्या परमार्थभूता भवति, जगदुपादानकारणत्वात्। तथाचाद्वैतं न सिद्ध्यति प्रत्युत द्वैतमेव भवति। तस्मादनाद्यनिर्वाच्याविद्यावादः अन्याय्यः अध्यासवाद एव निर्दुष्टः। किञ्च अनाद्यनिर्वाच्याविद्या अचेतना तस्याः जगद्रूपपरिणामः स्वत एव न संभवति, अयस्कान्तसान्निध्येन यथायसः प्रवृत्तिः तद्वच्चेतनस्यात्मनस्सान्निद्ध्यात् प्रवर्तते इति चेत् तर्हि आत्मनस्सान्निध्यस्य सर्वदाविद्यमानत्वात् सदा प्रवृत्तिरेव स्यात् न निवृत्तिस्संभवति। अतः प्रलयाभावप्रसंगः स्यात् प्रलयस्तु कीर्तितः। किञ्च आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति आनन्दं प्रयन्त्यभिसंविशंति— इत्यादिश्रुतिविरोधः, न्यायविरोधश्च— इत्यादि दोषाः दृश्यन्ते। अतोऽयं

अनाद्यनिर्वाच्याविद्यावादः त्यक्तव्यः अध्यासवाद एव अनुसर्तव्यः अध्यासवादे आत्मव्यतिरिक्तस्सर्वोऽपि अध्यासकल्पितः अध्यासे तत्त्वज्ञानेन बाधिते सर्वोऽपि बाधितो भवति आत्मा एक एव अबाधितस्सन् वर्तते । अध्यासे ज्ञानेन बाधिते सति स्वरूपेणावस्थितो भवति । स्वरूपावस्थितिरेव मोक्षः

सर्वेषां श्रेयसे नारायणं स्मरामि ।

मैसूरु. श्री ज्ञानानन्देन्द्रसरस्वतीभिक्षुः

जम्बूर हौस.

1-10-82

ಈ ಕೆಳಗೆ ಬರೆದಿರುವ ಮಹಾತ್ಮರು ಪಾದಪೂಜೆಯ ರೂಪದಿಂದಲೂ ಕಾಣಿಕೆಯ ರೂಪದಿಂದಲೂ ಕೊಟ್ಟ ದ್ರವ್ಯವನ್ನು ಈ ಪುಸ್ತಕವನ್ನು ಪ್ರಿಂಟು ಮಾಡಿಸಲು ಉಪಯೋಗಿಸಿರುತ್ತೇನೆ. ಈ ಮಹಾತ್ಮರಿಗೆ ಸರ್ವಜ್ಞನೂ ಸರ್ವಶಕ್ತನೂ ಆದ ಪರಮಾತ್ಮನು ಶ್ರೇಯಸ್ಸನ್ನುಂಟುಮಾಡಲೆಂದು ನಾರಾಯಣನನ್ನು ಸ್ಮರಿಸುತ್ತೇನೆ.

ಶ್ರೀಯುತರಾದ—

| | | |
|---|---|---|
| 1 | ವೈ. ವಿ. ಅಶ್ವತ್ಥನಾರಾಯಣ | ಕಲ್ಕತ್ತ |
| 2 | ವೈ. ವಿ. ಶಂಕರನಾರಾಯಣ | ವಿಶಾಖ ಪಟ್ಟಣ |
| 3 | ಶ್ರೀ ಅನಿಲ್‌ಕುಮಾರಸೇಟ್ ಮತ್ತು ಆವರ ಮಾತೃಶ್ರೀಯವರು | ಮೈಸೂರು |
| 4 | ಜಂಬೂರು ತಿಮ್ಮಪ್ಪಯ್ಯನವರು ಮತ್ತು ಅವರ ಮಕ್ಕಳು | |
| 5 | ಹೆಚ್. ಎನ್. ರಾಮ್‌ರಾವ್ | ,, |
| 6 | ಹೆಚ್. ಎನ್. ಕೃಷ್ಣರಾವ್ | ,, |
| 7 | ಹೆಚ್. ಎನ್. ಅನಂತರಾವ್ | ,, |
| 8 | ವೇ॥ಬ್ರ॥ಶ್ರೀ॥ ಅಗ್ರಹಾರದ ಶ್ರೀನಿವಾಸಭಟ್ಟರು | ಮೈಸೂರು |
| 9 | ಡಾಕ್ಟರ್ T. M. ಗೋಪಾಲ್‌ರವರು | ,, |
| 10 | ನಂಜನಗೂಡು ನಂಜುಂಡಸ್ವಾಮಿಗಳು | ,, |
| 11 | ಮೈಸೂರು ಇಂಜಿನಿಯರ್ ಶಿವಸ್ವಾಮಿಗಳು | ,, |
| 12 | ಕಲ್ಲೂರು ನಾರಣಪ್ಪನವರು | ಬೆಂಗಳೂರು |
| 13 | ಕಂದಾಚಾರ್ ಲಕ್ಷ್ಮೀನಾರಾಯಣರಾವ್ | ಅರಸೀಕೆರೆ |
| 14 | ಮತ್ತೂರು ಅಚ್ಚಣ್ಣಶಾಸ್ತ್ರಿಗಳ ಮಕ್ಕಳು | ಬೆಂಗಳೂರು |

15 ಯಳ್ಳಂಬಳಸೆ ಐಯ್ಯನವರ ರಾಮಕೃಷ್ಣಸ್ವಾಮಿಗಳು
16 ಶ್ರೀಮತೀ ಶಾರದಮ್ಮನವರು ಬೆಂಗಳೂರು
17 ಶ್ರೀ ರಾಮಚಂದ್ರ ಐಯ್ಯರ್
18 ಲೇಟ್ ಹಿರಿಯಣ್ಣಯ್ಯನ ಮಕ್ಕಳು ಶಂಭುಶರ್ಮಾ ಬೆಂಗಳೂರು
19 ,, ,, ರಮೇಶ್‌ಶರ್ಮಾ ,,
20 ,, ಪತ್ನಿ ಶ್ರೀಮತಿ ರುಕ್ಮಿಣಮ್ಮ ,,
21 ಪ್ರಜಾ ಪ್ರಿಂಟರ್ಸ್ ಶ್ರೀನಿವಾಸರಾವ್ ಬೆಂಗಳೂರು
22 ,, ಕೇಶವರಾವ್ ,,
23 ಶ್ರೀ ಟಿ. ವಿ. ಶ್ರೀನಿವಾಸಯ್ಯನವರು ಬೆಂಗಳೂರು
24 ಹೆಚ್. ಸಿ. ಸುಬ್ರಹ್ಮಣ್ಯ ಭಟ್ಟರು ,,
25 ಪಿ. ಆರ್. ಸೀತಾರಾಮರವರು ಗುಂಡ್ಲುಪೇಟೆ
26 ಶಿವಮೊಗ್ಗ ದುರ್ಗಾ ಲಾಡ್ಜ್ ಪ್ರೊಪ್ರೈಟರ್
27 ಶ್ರೀ ಶ್ರೀ॥ ಮೂರ್ತಿಗಳ ಮೂಲಕ ಒಬ್ಬ ದಾನ ಶೌಂಡರು
28 ಕೃಷ್ಣಪ್ಪನವರು ಬೆಂಗಳೂರು
29 ಕುಡ್ಲೂರು ಶ್ರೀನಿವಾಸಯ್ಯನವರು
30 ಸಕ್ಕರೇ ಪಟ್ಟಣದ ವೆಂಕಟಾಚಲಯ್ಯನವರು
31 ,, ಚಂದ್ರಮೌಳಿಯವರು
32 ಶ್ರೀ ಸತ್ಯನಾರಾಯಣಯ್ಯ ಯಗಟಿ
33 ಶ್ರೀ ಜಿ. ವಿ. ನಾರಾಯಣರಾಯರು
ಶಂಕರ ನಾರಾಯಣ ದೇವಸ್ಥಾನ ಮೈಸೂರು
34 ವೇ॥ಬ್ರ॥ಶ್ರೀ॥ ಸೋಮೇಶ್ವರ ದೇವಸ್ಥಾನದ
ನರಸಿಂಹಮೂರ್ತಿಗಳು ಮೈಸೂರು

35 ವೇ॥ಬ್ರ॥ಶ್ರೀ ಸೋಮೇಶ್ವರ ದೇವಸ್ಥಾನದ
ಕೃಷ್ಣಮೂರ್ತಿಗಳು ಮೈಸೂರು

36 ಜಂಬೂರು ವೆಂಕಟರಮಣಯ್ಯನವರು ಮತ್ತು
ಇವರ ಪುತ್ರರು ,,

37 ಕಡ್ಲೆಭಟ್ಟಿ ಕೃಷ್ಣಪ್ಪನವರು ಮೈಸೂರು

38 ಶ್ರೀ ಪರಿಮಳ ಫ್ಯಾಕ್ಟರಿ ಶ್ರೀನಾಗರಾಜರಾವ್ ಮೈಸೂರು

39 ರೈಲ್ವೆಡಿಪಾರ್ಟ್‌ಮೆಂಟಿನ ಹೆಚ್. ನರಸಿಹ್ಮಮೂರ್ತಿಗಳು ಮೈಸೂರು

40 ಶಂಕರ ಮಠದ ವೇ॥ಬ್ರ॥ಶ್ರೀ ಲಕ್ಷ್ಮೀನಾರಾಯಣ ಭಟ್ಟರು
ಮೈಸೂರು

41 ಟಿ. ಹಿರಿಯಣ್ಣ ಶಾಸ್ತ್ರಿಗಳು ಕಂಟ್ರಾಕ್ಟರ್ ಇವರ ಮಕ್ಕಳು
ಟಿ. ಬೆಚ್. ರಾಮಸ್ವಾಮಿಗಳು ಇಂಜನಿಯರ್

42 ಅರಳಿ ಕಟ್ಟೆ ಶ್ರೀ ನಾಗೇಶರಾಯರು

43 ಅಂತರಗಟ್ಟೆ ನಾ॥ ಶಂಕರಲಿಂಗಯ್ಯನವರು ಇವರ ಮಕ್ಕಳು

44 ಕಿಕ್ಕೇರಿ ಗುಂಡಪ್ಪನವರು

45 ಗುಂಡಪ್ಪನವರ ಬೀಗರು ಶ್ರೀ ಸುಬ್ಬಣ್ಣನವರು

46 ಶ್ರೀ ಕೃಷ್ಣನವರು ಚನ್ನರಾಯಪಟ್ಟಣ

47 ಗೀತಾ ಪ್ರಚಾರಣೇ ಸಭೆಯವರು

84 ಶ್ರೀ ಅನಂತರಾಮಯ್ಯನವರು ಮೈಸೂರು

49 ಶ್ರೀ ಮದ್ಭಾಷ್ಯಭಾಷ್ಯಶ್ರೋತೃಭ್ಯಶ್ಚ

# ಶ್ರೀ ಜ್ಞಾನಾನಂದೇಂದ್ರಸರಸ್ವತೀಸ್ವಾಮಿಗಳವರ ಇತರ ಗ್ರಂಥಗಳು

मूलविद्या भाष्यवार्तिकविरुद्धा (संस्कृत)

ಮೂಲಾವಿದ್ಯಾ ಭಾಷ್ಯವಾರ್ತಿಕವಿರುದ್ಧಾ (ಕನ್ನಡ)

ಶ್ರೀ ಸ್ವಾಮಿ ಶಿವಾನಂದರ ಉಪದೇಶಗಳು

ಮೂಲಾವಿದ್ಯಾವಿಮರ್ಶೆ

ಪಾರ್ವಣಶ್ರಾದ್ಧತಿಥಿನಿರ್ಣಯಃ

**Sri Shankara's Adwaita Siddhanta (English)**

ಬೋಧಾಯನಸಂಧ್ಯಾ

ಬೋಧಾಯನ ಪಾರ್ವಣಶ್ರಾದ್ಧಪ್ರಯೋಗಃ

शङ्करसिद्धान्तः (संस्कृत)

ಶಂಕರಸಿದ್ಧಾಂತ (ಕನ್ನಡ)

भामतीसमालोचनम् (संस्कृत)

## एतत्पुस्तकोक्तमुख्यविषयसंग्रहः एतद्विरुद्ध-वाचस्पतिमिश्रवाक्यानि च ।

उपनिषद्द्रष्टारो महर्षयः आत्मानात्मनोरितरेतराध्यासं तत्त्वज्ञानेन बाधित्वा, साक्षिस्वरूपेण स्थित्वा द्वितीयब्रह्मात्मैकत्वमनुभूय " आत्मा वा इदमेक एवाग्र आसीत् " इति उद्घोषयामासुः ।

श्रीगौडपादाः (मां. का. पु. 79, 81)

जीवं कल्पयते पूर्वं ततो भावान्पृथग्विधान् ।
बाह्यानाध्यात्मिकांश्चैव यथाविद्यस्तथास्मृतिः ॥

इति प्रथमतो आत्मा देहे आत्मानमध्यस्य " अहं जीवः " इति व्यवहरति । अध्यासानन्तरमेव सर्वव्यवहारः, अतो मूलाविद्या-व्यवहारोऽपि अध्यासानन्तर एव । अत एव भाष्यकारैः " अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसार-प्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य माया, शक्तिः प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते " इत्यादिना मायाया अध्यासकल्पितत्व-मुक्तम् । व्यवहारेऽपि माया " अहं मायेति " वक्तुं न शक्ता जडत्वात्, अध्यस्तपुरुषेणैव " इयं माये "ति वाच्यम् । अतो माया अनादिः, मायाकार्योऽध्यास इति वाचस्पतिमिश्राणां वचनं असङ्गतं प्रमाणविरुद्धं भाष्यवाक्यविरुद्धञ्च । मायाया अनाद्य-निर्वाच्यवस्तुत्वांगीकारे ज्ञानबाध्यत्वाभावात् द्वैतापत्तिर्दुर्निवार्या ।

मायाविशिष्टब्रह्मणो जगत्कारणत्वांगीकारे तदनन्यत्वाधिकरणन्यायेन विशिष्टब्रह्मण एव सत्यत्वं स्यात् तच्चानिष्टम्। "हिरण्यगर्भस्समवर्तताग्रे" इत्यादिना विशिष्टब्रह्मणः कार्यत्वाभिधानात्। अतो निर्गुणब्रह्मैव जगत्कारणमिति वक्तव्यम्। तस्य सर्वशक्तत्वान्मूलाविद्यासहायो नापेक्षितः। शुद्धब्रह्मणो निरवयवत्वान्निष्क्रियत्वाच्च जगत्कारणत्वं कथं स्यादिति चेत् उच्यते अविद्वानेव इन्द्रियद्वारा जगत्पश्यति। इन्द्रियाणि परंपरया जगज्जातानि। प्रपञ्चाज्जातानि इन्द्रियाणि स्वकारणीभूतप्रपञ्चस्य अभावं वक्तुं शक्नुवन्ति किम्? न शक्नुवन्ति। ये तु देहाध्यासं नत्त्वज्ञानेनावगतिपर्यन्तेन बाधित्वा स्वस्वरूपेण तिष्ठन्ति त एव शक्ताः प्रपञ्चाभावं द्रष्टुं वक्तुं च नान्ये प्रमातारः।

मूलाविद्यावादिनो ब्रह्माश्रिता मूलाविद्या जगद्रूपेण परिणमते, तन्मूलकं ब्रह्मकारणमित्युच्यत इति वदन्ति। तदनन्यत्वाधिकरणन्यायेन जगदुपादानकारणीभूता मायैव सत्या भवति कार्यमनृतं भवति। मूलाविद्याविशिष्टं ब्रह्मैव कारणमित्युच्यते चेत् तदा विशिष्टं ब्रह्मैव सत्यं भवति। शुद्धब्रह्मणः प्राप्तेर्द्वारमेव नास्तीति संभवति।

किञ्च सर्वोपिजनस्सुषुप्तौ मूलाविद्यायस्स्थितिं नानुभवन्ति, किन्तु सुषुप्तिमनुभूय जाग्रदवस्थां प्राप्य "न किञ्चिदवेदिषं" "सुखमहमस्वाप्स"मिति वदति। श्रुतिरपि "पश्यन् वै न

पश्यति न तु तद्द्वितीयमस्ति यद्विभक्तं पश्येत् " इति वदति । तस्या अयमर्थः । अहं दर्शनदक्षोऽस्मि, द्वितीयं दृश्यं नास्ति । अतो, न पश्यामि इति दृश्याभावं वदति । मूलाविद्यावादिनः मूलाविद्या तिसृष्वप्यवस्थासु दण्डायमाना वर्तत इति अनुमास्यत इति वदन्ति । सार्वत्रिकानुभवविरुद्धमनुमानं न प्रमाणमश्नुते इत्येतत्सर्वानुभव-सिद्धम् ।

किञ्च वाचस्पतिमिश्रैर्नानाविद्यांगीकृता नानाजीवाश्चांगीकृताः । नानाविद्यासु सतीषु नानाजीवेषु सत्सु कथमेकस्याद्वितीयब्रह्मात्मैक्य-ज्ञानं संभवेत् । न कथमपि संभवति । ज्ञानाभावे मोक्षोऽपि न संभवति । यदि संभवतीत्युच्यते तन्मिथ्याज्ञानमेव भवति ।

किञ्च विशेषविज्ञानाभावः सुषुप्तिः । तत्रापि मूला-विद्यास्तित्वांगीकारे ' इयं मूलाविद्येति ' विशेषविज्ञानमेवस्यात् न विशेषविज्ञानाभावः । किन्तु विशेषविज्ञानं न कोऽप्यनुभवति नांगीकरोति च ।

भाष्यकारैः (पु. 349 3-2-7) सर्वत्र च विशेषविज्ञानो-परमलक्षणं सुषुप्तं न क्वचिद्विशिष्यते इत्युक्तम् । (पु. 351 3-2-7) अपि च स्थानविकल्पाभ्युपगमेऽपि विशेषविज्ञानोपशमलक्षणं तावत्सुषुप्तं न क्वचिद्विशिष्यत इत्युक्तम् । मूलाविद्यासत्वे विशेषविज्ञानलक्षणं सुषुप्तं स्यात् एतद्भाष्यवाक्यविरुद्धं सर्वानुभव-विरुद्धं च ।

भाष्यकाराः—

पु. 351 :-2-7

मू. भा ॥ (1) स्वरूपमापन्नस्सुप्तो भवति ।

(2) न कदाचिर्ज्जीवस्य ब्रह्मणा सम्पत्तिर्नास्ति स्वरूपस्या-
नपायित्वात् ।

(3) तत्र सतिसंपन्नस्तावत्तदेकत्वान्नविजानातीति युक्तम् ।

(4) सत्येनसंपन्नो न विजानातीति युक्तम् ।

(5) आत्मैव सुप्तिस्थानम् ।

स ॥ इत्यादिना जीवस्य सुषुप्तौ सत्सम्पत्तिं वदन्ति
श्रीवाचस्पतिमिश्राः सत्सम्पत्तिं नांगीकुर्वन्ति ।

## THE GIST OF THE BOOK

*By U. Chandrasekharayya*

The great seers of the Upanishads, having annihilated Adhyasa in themselves, which consists in one's mistaken identification of the Self (Atman) with the non-self (Anatman) and of the non-self with the Self, have declared in unmistakable terms that the Atman alone existed in the beginning, and that there was nothing else. This came to them as an integral experience when they established themselves in the witnessing conscious Self—the noumenal reality behind the phenomenal scene of the subject-object duality. In other words, their declaration of there being only one reality behind the apparent diversity of creation is the outcome of their realisation of the oneness of the individual self with Brahman or the Absolute.

How does the cycle of samsara or our earthly existence begin? Well, the question is answered by Sri Gowdapadacharya and Sri Shankaracharya. As the very first step, as we find it, there is the concept of Jiva or

the individual emerging in our consciousness. This is perceptible to us inwardly as the notions of "I" and "mine". Thereafter follow a series of subjective and objective diversifications in what is otherwise a homogeneous reality. It is stated by Sri Gowdapada that one concocts things and opinions in accordance with one's Vidya or the state of enlightenment. All kinds of activities–whether mental or physical—take their origin from this primary notion of one's being the Jiva or the individual. It is only after the manifestation of the psyche in the form of "I am" that we even begin to philosophise : Even the postulation of Mulavidya as the cause of creation, as is held by certain commentators and thinkers, becomes possible only after the mutual superimposition between the Atman and the body is effected. This is exactly what Shankara means when he says in his commentary on the Brahmasutras (2.1.14) :

"The names and forms, called Maya, which constitute the seed of the entire phenomenal existence, *which are concocted by ignorance (Avidyakalpita)*, which are identical as it were with the omniscient God, which can

neither be termed as different or non-different from Him are said to be Maya, Shakti or Prakriti." Thus it is concluded that Maya is concocted by Avidya or Adyasa and that it has no real existence. It is obvious that even in the ordinary level of our understanding we do not see anything like Maya rising up and claiming, " Here I am ! I am Maya ! " This ought to be so because, Maya is after all insentient. It is the ignorant man who has confounded the self and the non-self that claims existence for Maya and says, " Oh, this is Maya. " Therefore it is pointed out that Sri Vachaspathi Misra's position with regard to the doctrine cf Maya that it is beginningless and is the cause of Adhyasa etc., is untenable, inconsitant with our experience and also opposed to Sankara's own position. Defining Maya as a beginningless and inexpressible entity amounts to giving it the character of indestructibility even on the rise of Self-knowledge.

If instead of an unqualified and impartite Brahman, a Brahman qualified by Maya is accepted as the cause of creation, the qualified Brahman earns the status of the final reality by the logic of the cause being real and the

effect unreal (तदनन्यत्व). The cause is Brahman and the effect is creation in this context and the Suthra states the non-difference of creation from Brahman, its cause. But however, when creation is viewed as distinct from Brahman, as is done while we are in the state of Adhyasa or Avidya it becomes a logical necessity to postulate a cause other than Brahman, in order to explain the *phenomenon* of creation. That it is how the concept of Maya came to be incorporated into the theory of creation. The concept of Maya, it is important to note, takes its origin in the human mind (i. e. the Jiva, or the Adhyastha), which has not yet realised the world as Brahman. For one who has realised the meaning of the Upanishadic dictum 'Sarvam Khalvidam Brahma', there exists neither the world, whose status is no more than a superimposition on Brahman, nor Maya, its so called cause, nor the Jiva, who supposes the existence of Maya. This conclusion is clearly stated in Shankara's statement "या मा सा माया" : "That which does not exist is Maya". Therefore it is but fair, to hold the Nirguna Braman alone as the cause of creation, if at all one wishes to seek a

causal explanation of creation. For the Omnipotent Brahman there is no need of Mulavidya to bring about the creation which is, properly speaking, not creation but a manifestation of Itself.

If it be asked how the Nirguna (the unqualified homogeneous) Brahman which is devoid of all action be held as the cause of the universe, the answer is as follows : It is the ignorant who see the world with their senses. It is through the instrumentation of the sensorium that the world takes its birth, and conversely, the senses are constitued by the world. Therefore, how can the senses whose cause the world is, deny the existence of the latter ? This is constitutionally impossible for them. Only those who have destroyed their ignorance, that is, their sense of identification of the body, mind etc., to the extent of realising the absolute oneness of the Atman and are firmly rooted in their own essential being (Swaswaroopa) can see the non-existence of the world and also declare it to be so. This is never possible for such others whose cognition is conditioned by the adjuncts of the body, mind and senses.

The votaries of Mulavidya or the advocates of the doctrine of Original Ignorance maintain that it is the Brahman-based Mulavidya which transforms itself into the world and therefore, if Brahman is said to be the cause of the world, it is through Mulavidya that Brahman becomes the cause and not directly. In accordance with the position taken by the Brahma Sutras viz., the non-difference of the cause and effect, the world as the effect is sublated into its cause, Brahman, and therefore, the world is said to be unreal. Thus the logic of the thesis here is that the cause is real while the effect is unreal. Now, by the same logic, if it be held that Brahman qualified by this original ignorance or Mulavidya is tne world-cause, then the qualified Brahman assumes the status of the ultimate reality in Advaitha Vedanta. This is, on the face of it, absurd. The natural corollary to this conclusion is that there is no way now open to attain the unqualified Brahman, or Pure Consciousness.

Not only no one experiences the preserce of Mulavidya in Sushupthi or deep sleep, but everyone, having experienced Sushupthi, makes

on waking such statements as " I knew nothing ", " I enjoyed myself in sleep ". The Upanishad also says "The seer continues to see though there is nothing to look at ". The meaning is " I am still capable of seeing, but there is nothing second to myself there. Therefore when I say I didn't see anything, it only refers to the absence of the seen or the object ". The Mulavidya-vadins however say– let it be noted that they say this by inference and not by experience,— that Mulavidya subsists continuously through all the three states of consciousness viz, waking, dreaming and sleeping. It is clear that inference cannot be applied to negate what is given as a universal experience.

Sri Vachaspathi Misra admits the plurality of the Jivas as well as the plurality of Avidya. Well, if plurality of Avidya is accepted, it ought to lead to the concept of the plurality of the Jivas. How then could there arise the knowledge of the one, secondless Atman while there exist a number of Jivas conditioned by a number of Avidyas ? Such a knowledge can never arise if VachaspathiMisra's stand is admitted. In the absence of this knowledge

of the oneness of the Atman, there can be no salvation or Moksha either. If it is contended that Moksha is possible even on such a premise, it should be admitted that it is not Samyagnana but Mithyagnana i,e., the illusion of having attained true knowledge.

How Sushupthi is to be reckoned as a state devoid of particularised knowledge ?

If there was particularisation of cognition as denoted in such expression as ' this ' or ' that ', it should have been given to us in our experience. But the experience of Sushupthi tells us that the state is marked by a complete absence of particularisation in cognition. If Mulavidya was present in Sushupthi one would recognise it as ' This is Mulavidya '. However nobody experiences any kind of particularised knowledge in the state of Sushupthi.

It is stated by Sri Shankaracharya that Sushupti is characterised by a complete cessation of distinctive formulations of our cognitive faculty. He further says that even this reckoning of the absence of particularisation as the characteristic of Sushupti is done

only on our transference into another state like the waking and not in Sushupti itself. A state in which such a self-awareness of having no distinctive knowledge occurs, it should be understood, is not the state of Sushupti. If the presence of Mulavidya in Sushupti, which would characterise it with specificity of cognition (विशेषविज्ञान) is asserted, it goes not only against everybody's experience, but even contradicts the standpoint of Shankaracharya.

## अद्वैतम् परमार्थतः

पु. 52 मा.का. 1-17

प्रपञ्चो यदिविद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥

भूतभविष्यद्वर्तमानकालेऽपि अद्वितीयः परमात्मा परमार्थभूतः, प्रपञ्चस्तु अविद्याकल्पितः, न परमार्थभूतः । प्रपञ्चः आत्मन आकाशस्संभूतः इत्यादिना वेदप्रमाणसिद्धः, प्रत्यक्षादिप्रमाणैश्च सिद्धश्च । स कथं अविद्याकल्पित इत्युच्यत इति चेत् श्रुणु । देहादिषु आत्मबुद्धिरविद्या तादृशाविद्यावानेव पुरुषः प्रपञ्चं पश्यति अविद्यावता पुरुषेण दृष्टः परमार्थो न भवति । तत्त्वज्ञानेन बाधितायामविद्यायां तत्कल्पितः प्रपञ्चोऽपि बाध्यते । किञ्च अविद्यावान् पुरुषः केन प्रपञ्चं पश्यति ? इन्द्रियादिभिः पश्यति । इन्द्रियाणि परंपरया प्रपञ्चाज्जातानि प्रपञ्चाज्जातानि इन्द्रियाणि प्रपञ्चो नास्तीति कथं वदन्ति । तानि प्रपञ्चः सत्य एवेति वदन्ति ।

यस्तु इन्द्रियाणि प्रपञ्चाज्जातानीति मत्वा देहेन्द्रियादिषु अहममाभिमानं बाधित्वा स्वस्वरूपेण तिष्ठन्पश्यति स आत्मानमद्वयं परमार्थभूतं पश्यति नेतरः ।

भ. गी. 13-26

यावत्संजायते किञ्चित्सत्त्वं स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥ 13-26

भा ॥ यावत्-यत्किंचित् संजायते-समुत्पद्यते सत्त्वं वस्तु किं अविशेषेण इति ? नेत्याह स्थावरं जङ्गमं च क्षेत्रक्षेत्रज्ञ-संयोगात् (अध्यासरूपात्) संजायते ।

मूलाविद्यावादिनः—

अनादिभूतायाः, त्रिगुणात्मिकायाः सदसद्भिन्नायाः, अक्षरं, अव्यक्तं, अव्याकृतं, अनिर्वाच्यं, शक्तिः, माया, अविद्या इत्यादिपदवाच्यायाः जगद्बीजभूताया, अनिर्वचनीय-वस्तुभूताया मूलाविद्यायाः सचराचरं जगत्संजायते । तन्मूलकं ब्रह्म जगत्कारणम् ।

स ॥ भाष्यकारीत्या मनोमिथ्यावृत्तिरूपान्मिथ्याज्ञानरूपादध्यासात् जगत्संजायते इत्यर्थः मूलाविद्यावादिनां प्रकारेण अनिर्वचनीयवस्तुभूताया मूलाविद्यायास्संजायतइत्यर्थः । तन्मूलकं ब्रह्मकारणम् । तथाच अनिर्वाच्याविद्यायाः मूलाविद्याया ज्ञानबाध्यत्वासंभवात् द्वैतमेव परमार्थभूतमिति सम्पद्यते । अतो मूलाविद्यावादो भाष्यबहिष्कृतः सर्वथा त्याज्यः । अध्यासवाद एव निर्दुष्टो ग्राह्यः ।

# शुद्धाशुद्धपत्रिका ।

| | शुद्धम् । | अशुद्धम् । |
|---|---|---|
| पु. 3 | कारणां । | कारणा । |
| पु. 5 | आत्मैकत्वमेव । | आत्मेकत्वमेव । |
| पु. 7 | मिश्रैरुक्त । | मिश्रैरक्ता । |
| पु. 22 | अवशेषता । | व शेषता । |
| पु. 50 | वस्तुभूता । | वस्तुभूत । |
| पु. 53 | | इति कल्पितः |
| पु. 55 | आत्मा | ह्यात्म |
| ಕೃತಜ್ಞತಾ ವಿಜ್ಞಾಪನ ಎಂಬ ಪುಟದಲ್ಲಿ ಕೊನೆಯಲ್ಲಿದೆ | पारिजातमुद्रण-चालकाभ्यश्च | पारिजातमुद्रण |

## उपनिषद्द्रष्टणां वाक्यानां भाष्यवाक्यानां, मूलाविद्यावादिनां वाक्यानां परस्परविरोधः प्रदर्श्यते ।

१. उपनिषत्सु ' आत्मा वा इदमेक एव अग्र आसीत् ' इति वर्तते

मूलाविद्यावादे अनिर्वाच्याविद्या, प्रकृतिः माया, क्षरमित्यादि शब्दवाच्या अनाद्यविद्यापि आसीत् ।

२. भा । शुद्धं ब्रह्मैव जगदुपादानकारणम्, ' आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते ' इत्याद्युक्तेः ।

वा । ब्रह्माश्रिता अनाद्यनिर्वाच्याविद्येतिख्याता मूलाविद्या जगदुपादानकारणम् । तन्मूलकं ब्रह्म जगदुपादानकारणम् ।।

अनाद्यनिर्वाच्याविद्यासचिवं ब्रह्म जगदुपादानकारणम् ।

३. भाष्यकाराः—

मायाया अध्यासरूपाविद्याकल्पितत्वं वदन्ति ।।

मूलाविद्यावादिनः—अध्यासरूपाविद्याया मायाकार्यत्वं वदन्ति ।

४. भा । एवमयमनादिरनन्तोऽध्यासः ।

वा । मायाकार्यमध्यासः ।

५. भा । ज्ञानं न वस्तुनुत् ।

ज्ञानं तु ज्ञापकम् न कारकम् ।।

वा ज्ञानमनाद्यनिर्वाच्याविद्यां अनिर्वचनीयवस्तुभूतामपि बाधते ।

६. भा । यत्कालं ब्रह्मज्ञानं तत्कालं ब्रह्मप्राप्तिः ।

वा । विदेहकालीन एव मोक्षो मुख्यो मोक्षः जीवन्मुक्तेर्गौणत्वात ।

७. भा । यस्मादज्ञात्वा सत्संपद्यन्ते तस्मात्तत्तद्रूपेणावर्तन्ते । आत्मैव सुप्तिस्थानम् । अपि च न कदाचिज्जीवस्य ब्रह्मणा-सम्पत्तिर्नास्ति, स्वरूपस्य अनपायित्वात् ।

वा । जीवः, अविद्या, लयविक्षेपसंस्कारौ सुषुप्तौ वर्तन्ते । इति अनुमास्यते ।

८. भा । प्रतिपत्तिक्रमेणाध्यासस्य कारणम् अग्रहणम् ।

वा । अध्यासस्य कारणं मूलाविद्या ।

९. "सुखमहमस्वाप्सम्" "न किञ्चिदवेदिषम्" इति सौषुप्तानुभवपरामर्शो विशेषज्ञानाभावं विषयीकरोति ।

वा । "सुखमहमस्वाप्सम्" "न किञ्चिदवेदिषम्" इति सौषुप्तानुभवपरामर्शो मूलाविद्यां विषयीकरोति ॥

१०. भा । प्रत्येत्येव हि केवलं रजतमिति न तु तत्र रजतमस्ति ।

वा । अनिर्वचनीयरजतमस्ति ।

११. भा । अध्यासकल्पिता मूलाविद्या ज्ञानेनबाध्यते ।

वा । अध्यासकारणीभूतापि मूलाविद्या ज्ञानबाध्येत्यंगीक्रियते ।

१२. भा । अविद्या, विद्या, उभे अन्तःकरणवृत्तिरूपे ।

वा । मूलाविद्या ब्रह्माश्रिता अनाद्यनिर्वाच्याविद्येत्युक्ता ।

१३. भा । उभयोरसमानाधिकरण्यात्

परस्परविरुद्धयोर्बाध्यबाधकभाव उपपद्यते ।

वा । भिन्नाधिकरणस्थयोरपि परस्परविरोधाद्बाध्यबाधकभावत्वमंगीक्रियते ।

## अध्यासवादविरुद्धो मूलाविद्यावादः

१. उपनिषदः अनाद्यनंतं अद्वितीयं ब्रह्मैवेकं अनादिं वदंति।

मूलाविद्यावादिनः तद्विरुद्धतया मूलाविद्यामप्यनादिं वदन्ति ।

२. उपनिषदः ब्रह्मैवजगदुपादानकारणमिति वदन्ति ।

मूलाविद्यावादिनः मूलाविद्या उपादानकारणं तन्मूलकं ब्रह्म उपादानकारणमिति वदन्ति ॥

३. भाष्यकारा मूलाविद्यां अध्यासकल्पितां वदन्ति ।

मूलाविद्यावादिनः अध्यासकाणां मूलाविद्यां वदन्ति ।

४. भाष्यकाराः अध्यासं अनादिं वदन्ति ।

मूलाविद्यावादिनः अध्यासं मूलाविद्याकार्यमिति वदन्ति ।

५. भाष्यकाराः ज्ञानं न वस्तुनुत् इति वदन्ति ।

मूलाविद्यावादिनः तत्त्वज्ञानं अनिर्वचनीयवस्तुभूतां, मूलाविद्यां बाधत इति वदन्ति ।

६. भाष्यकाराः शुद्धं ब्रह्मजगत्कारणमिति वदन्ति ।

मूलाविद्यावादिनः विशिष्टं ब्रह्म जगत्कारणमिति वदन्ति ।

७. भाष्यकारास्सद्योमुक्तिं वदन्ति ।

मूलाविद्यावादिनः विदेहकालीनमोक्षो मुख्यो मोक्ष इति वदन्ति ॥

८. भाष्यकाराः सुषुप्तौ जीवः ब्रह्मणि एकतांगच्छति इति वदंति ।

मूलाविद्यावादिनः जीवः, अविद्या, लयविक्षेपसंस्कारौ सुषुप्तौ विद्यन्त इति वदन्ति ।

## परिशिष्टम्

'आत्मन आकाशः संभूतः' इत्यादि श्रुत्युक्तं प्रत्यक्षादि-प्रमाणसिद्धं अचेतनात्मकं विकारि अनित्यं सावयवं च जगत् दृष्ट्वा अस्य जडात्मना नित्येन केनचिदुपादानकारणेन भवितव्यम्, यथा घटादेर्मृदादिः—इत्यालोच्य सुप्रसिद्धदर्शनकाराः स्वस्वविचारशक्त्यनु-सारेण भिन्नं भिन्नं जगतः उपादानकारणं कल्पयामासुः। तद्यथा— नैयायिकावैशेषिकास्तु परमाणुं अचेतस्य जगतः उपादानकारणमिति निर्णयामासुः। साङ्ख्ययोगदर्शनकारास्तु—प्रधानं सत्त्वरजस्तमो-गुणसाम्यरूपमचेतनस्य जगतः उपादानकारणमिति जगुः। पूर्वमीमांसकाश्च प्रकृतिं कारणमिति प्रतिपादयामासुः। उत्तरमीमांसा-कारा विशिष्टाद्वैतिनः श्रीमद्रामानुजाचार्याः सूक्ष्मा अचित् परिणाम्यु-पादानकारणमिति प्रतिपादयामासुः। माध्वद्वैतिनस्तु प्रकृति-मुपादानकारणमिति निर्णयं चक्रुः। इमे सर्वेऽपि अचेतनरूपजग-तस्सत्यत्वमेव वदन्ति, किन्तु अनित्यत्वं वदन्ति। जगदनृतत्व-वादिनः आधुनिकाद्वैतवेदान्तवादिनोऽपि ईश्वराधीनभूतां नामरूपबीज-भूतां अनिर्वचनीयाविद्यां अचेतनरूपामविद्यां ज्ञानबाध्यां जगदुपादा-

नकारणमिति प्रतिपादयन्ति । तन्मूलकैव ब्रह्मणो जगत्कारणत्वोक्तिरित्यपि वदन्ति । किञ्च तस्याः ईश्वराधीनत्वात् ज्ञानबाध्यत्वमपि वदन्ति । श्रीमद्रामानुजाचार्यैः सूक्ष्माचितः परमात्माधीनत्वमङ्गीकृत्यापि तस्याः ज्ञानबाध्यत्वं नोक्तम् । ज्ञानं वस्तुनः कीदृशस्यापि बाधकं न भवति, यतः यादृशं वस्तु वर्तते अनिर्वचनीयं वा निर्वचनीयं वा भवतु तादृशमिति वस्तुनः प्रकाशकमेव ज्ञानम्, न तु तद्बाधकमित्यतः इदं वस्तु परमात्माधीनमित्येव ज्ञापयति, न तु तत् बाधते । यदि मूलाविद्या उपादानकारणत्वेन अङ्गीक्रियते, तदनन्यत्वाधिकारणन्यायेन उपादानकारणीभूता मूलाविद्यैव परमार्थभूता इत्येव खलु निर्णयः संभवति । तथा च ब्रह्मणः गतिसामान्यत्वं नास्तीत्येव वक्तव्यं भवति ।

किञ्च वस्तुनः ज्ञानबाध्यत्वाभावात् ईश्वराधीनापि ज्ञानबाध्या न भवतीति हेतोर्द्वैतमेव परमार्थमिति संपद्यते ॥

किञ्च, मूलाविद्याया प्रपञ्चस्य उपादानकारणत्वेन अङ्गीकारे प्रपञ्चांतर्गतस्य देहस्यापि उपादानकारणत्वात् देहपातपर्यन्तं सर्वथा ज्ञानबाध्यत्वमसंभवमेव स्यात् । कार्यसत्त्वे कारणस्य असत्यत्वासंभवात् । देहपातादूर्ध्वमेव मूलाविद्याया नाशः स्यात्, न ज्ञानसमकाले, अतः 'अत्र ब्रह्म समश्नुते' इति श्रुतिविरोधः । यत्कालं ब्रह्मज्ञानं तत्कालं ब्रह्मप्राप्तिः इति भाष्यावाक्यस्य च विरोध एव भवति । मूलाविद्यानाशानन्तरमेव 'एकमेवाद्वितीयं ब्रह्म' इति वक्तव्यं स्यात्; सर्वदा एकमेव ब्रह्म इति वक्तुं अशक्यं

भवति । एतत्सर्वं समाधानचित्तैर्विचार्य मूलाविद्या ग्राह्या वा अग्राह्या वा–इति निर्णेतव्या ।

किञ्च मूलाविद्या ब्रह्माश्रिता ब्रह्मविषया ; ज्ञानं तु जीवस्य अन्तःकरणनिष्ठम् ? भिन्नाधिकरणयोर्ज्ञानाज्ञानयोर्ज्ञान-बाध्यत्वमपि न संभवति । मूलाविद्यायाः अस्तित्वे प्रामाणं नास्ति । भाष्यकारैरुक्तमिथ्याज्ञाननिमित्तः इति पदं मिथ्या च तदज्ञानं च मिथ्याज्ञानमिति पदच्छेदं कृत्वा मिथ्याशब्दस्य अनिर्वचनीयार्थकत्वमुक्त्वा अज्ञानपदस्य जडशक्ति-रिति साहसेन अर्थं कृत्वा निमित्तपदस्य उपादानार्थकत्वं प्रकल्प्य मिथ्याज्ञाननिमित्तः इत्यस्य अनाद्यनिर्वचनीयभावरूपजडशक्त्युपादान इति पञ्चपादिकाकाराः अर्थं कल्पयामासुः । एतदेव मूलाविद्या-यास्सत्त्वे प्रमाणं नान्यत्प्रमाणं विद्यते । भामतीकारास्तु मिथ्या-ज्ञानं—अध्यासः, निमित्तः–निमित्तः एवार्थः इति अध्यास-निमित्तः इत्येव अर्थं वर्णयामामुः ॥ पुनः अनिर्वाच्याविद्योपादनं जगत् इत्यर्थं च कल्पयामासुः ।

'गति सामान्यात्' (१–१–१०) इति सूत्रभाष्ये । 'समानैव हि सर्वेषु वेदान्तेषु चेतनकारणावगतिः इत्यात्मनः कारणत्वं दर्शयन्ति सर्वे वेदान्ताः ॥' इति चेतनकारणत्वं प्रतिपादितम् । 'जन्माद्यस्य यतः' (सू १-१-२) इति सूत्र-भाष्ये 'अस्य जगतः.... .......जन्मस्थितिभङ्गं यतः सर्वज्ञात्

सर्वशक्तेः कारणाद्भवति तद्ब्रह्म ' इति ब्रह्मण एव कारणत्वं प्रतिपादितम् ।

सू. १-४-२३. ' प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ' इति सूत्रभाष्ये उपादानकारणं च ब्रह्म अभ्युपगन्तव्यं निमित्तकारणं च इति ब्रह्मण एवोपदानकारणत्वं निमित्तकारणत्वं च प्रतिपादितम् । एवं स्थिते उपादानकारणं मूलाविद्या तन्मूलकमेव ब्रह्म कारणमिति मूलाविद्यावादिनः वदन्ति । तत्कथं संगच्छते ?

भाष्यवार्तिककारास्तु ब्रह्मैव अद्वितीयं परमार्थवस्तु, कालदेशकार्यकारणधर्माद्यतीतं अखण्डं सच्चिदानंदस्वरूपं तत् । तदतिरिक्तं किञ्चन नास्त्येव । त्रिष्वपि कालेषु देशकालादीनामभावेऽपि तद् ब्रह्म अव्यभिचरितस्वरूपं अद्वयं शिवं शांतं सर्वेषामात्मसूतं च वर्तते इति प्रतिपादयंति ॥

जगत् प्रमाणसिद्धं सर्वैरनुभूयते । भूमौ स्थित्वा भूमिर्नास्तीति वदतां वचनं अप्रमाणमित्याद्याक्षेपे प्राप्ते प्राहुर्भगवन्तो भाष्यकाराः (अध्यासभाष्ये) ' कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीति प्रमाणानि शास्त्राणि च इति ? उच्यते । देहेन्द्रियादिषु अहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः । न हि इन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति । न चाधिष्ठानमन्तरेण इंद्रियाणां व्यवहारस्संभवति । न चानध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियते । न चैतस्मिन् सर्वस्मिन्नसति असङ्गस्यात्मनः प्रमातृत्वमुपपद्यते । न च प्रमातृत्वमन्तरेण प्रमाण-

प्रवृत्तिरस्ति, तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च' इत्यद्यासरूपाविद्यावानेव प्रत्यक्षादीनां प्रमाणत्वं अंगीकरोति । अविद्यावता दृष्टः प्रपञ्चः परमार्थो न भवति, बाधिताविद्यः प्रपञ्चं न पश्यति । ब्रह्मैव सर्वमिति पश्यति इति प्रतिपादयामासुः । तत्र का नाम सा अविद्या इति प्रश्नस्य उत्तरत्वेन भाष्यकाराः 'तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते' इति आत्मानात्मनोरितरेतराध्यासं सर्वानुभवसिद्धं सर्वव्यवहारकारणं सर्वशास्त्रीय-व्यवहारस्यापि कारणं मोक्षशास्त्रव्यवहारस्यापि कारणमिति प्रदर्श्य, इदमध्यासरूपाज्ञानं नैसर्गिकम् इत्यप्युक्त्वा 'अन्योन्यस्मित् अन्योन्यात्मकतामन्येन्यधर्मांश्चाध्यस्य' इत्यनेन सर्वानुभवसिद्धोऽयमध्यासः न प्रमाणान्तरसाध्यः प्रमाणानां प्रमाणत्वमध्यासानुग्रहसिद्धमिति प्रदर्श्य 'एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः' इत्यन्तेन अध्यासस्यानादित्वमनन्तत्वं कर्तृत्वभोक्तृत्वप्रवर्तकत्वं सर्वानुभवसिद्धत्वं च प्रतिपाद्य 'अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदांताः आरभ्यन्ते' इत्युद्घोषयामासुः । अनेन आत्मैकत्वविद्याबाध्या अध्यासरूपाविद्यैव । अध्यासस्य अनुभवरूपत्वात अथा तद्बाधार्थमनुभवपर्यंतमेव आत्मैकत्वज्ञानमपेक्षितम् इति प्रतिपादयामासुः । तस्मात् अध्यासरूपाविद्यैव अनर्थकारणं अनुभवपर्यन्तात्मैकत्वविद्यैव तस्याः बाधिका, बाधिते तु अध्यासे अग्रहणरूपनिमित्तेन सह इहैव इदानीमेव

ज्ञानप्राप्तिक्षण एव ब्रह्मप्राप्तिः । ब्रह्मप्राप्त्यनंतरं ब्रह्मव्यतिरिक्तं किञ्चिदपि न दृश्यते जगत् । सर्वं ब्रह्मैव भवति । तदानीं अस्य जगतः कारणप्रश्नादीनामनवसरः । ज्ञानी अद्वितीयात्मानन्द-रूपेणैवावतिष्ठते ॥

ब्रह्मात्मैकत्वज्ञानात्पूर्वम् सर्वोऽपि व्यवहारः अप्रतिहत एव दृश्यते । यथा आकाशस्य एकत्वेऽपि निरवय-वत्वेऽपि अखण्डत्वेपि आकाशः एक एव निरवयवः अखण्डः इति ज्ञानात्पूर्वं घटाकाशकरकाकाशमहाकाशादिभेदव्यवहारो औपाधिको दृश्यते, तथा ब्रह्मात्मैकत्वज्ञानात्पूर्व अहं जीवः परिच्छिन्नः कर्ता, भोक्ता, कर्मफलभोगार्थं स्वर्गनरकादीन् प्रति गन्ता, दासः, किङ्करः, ध्याता, उपासकः, परमात्मा तु सर्व-व्यापी, मत्तो भिन्नः सर्वज्ञः सर्वशक्तः कर्मणां फलदाता सर्वात्मना सेव्यः ध्येय उपास्यः ज्ञेयश्च इत्यादि भेदव्यवहारः सन्ततो वर्तते । अतोऽस्याध्यासस्य सर्वव्यवहारास्पदस्य बाधार्थं मुमुक्षुः कामचार-कामवाद-कामभक्षणादिनिषिद्धकर्माणि त्यक्त्वा शास्त्रीयं कर्म श्रद्धा-भक्तिपुरस्सरमनुतिष्ठन्, तदपि कर्म सङ्गत्रयपरित्यागपूर्वकम् ईश्वरार्पण-बुद्ध्या ह्यनुतिष्ठन्, सर्वात्मानं सर्वेश्वरं परमात्मानमेव संततं ध्यायन्, भक्तिपुरस्सरं उपासनां कुर्वन् शुद्धचित्तस्सन् देहादिषु अहं ममेत्यादि रूपमध्यासं "अहं ब्रह्मास्मीत्य" नुभवरूपज्ञानेन विधूय ब्रह्मनिष्ठो भूत्वा सुखी भवेदित्येष एव सर्वोपनिषदां सिद्धांतः ॥

अध्यासवादिनोऽपि अद्वैतं परमार्थमिति वदंति ।

मूलाविद्यावादिनोऽपि परमार्थे अद्वैतं वदंति । उभयपक्षेऽपि फलं एकमेव । प्रक्रियाभेदे को दोषः ? ग्रामप्राप्तिर्मुख्या । मार्गभेदस्तु सह्यः । किमर्थं मूलाविद्यावादिनः अध्यासवादे दोषं आरोपयंति ? अध्यासवादिनः मूलाविद्यावादे दोषमुद्घाटयंति ? यदि फलविषये विवादः स्यात् तर्ह्येव दोषोद्घाटनं समञ्जसं स्यात् । न हि फलविषये विवादोऽस्ति—इति शङ्कायां इदमुत्तरम् ।

मूलाविद्यावादे जगदुपादानकारणभूता मूलाविद्या अनादिसिद्धा । वर्तमानकालेऽपि आत्मैकत्वज्ञानोत्पत्तिपर्यन्तं मूलाविद्या वर्तते, तत्कार्यसूतप्रपञ्चोऽपि वर्तते । ज्ञानोत्पत्त्यनन्तरं मूलाविद्या यदा ज्ञानबाध्याभवति, तदा तत्कार्यभूतप्रपञ्चोऽपि नभविष्यति सर्वमद्वैतात्मस्वरूपं भवति इति ।

आत्माधीनायाः अनादिभूताया वस्तुभूतायाः मूलाविद्याया ज्ञानबाध्यत्वप्रतिपादनं अदृष्टचरं असंभाव्यमानं च ॥

ज्ञानस्वरूपं भगवत्पादाः एवं जगुः (सू. भा. ४-१-१३) । पूर्वसिद्धकर्तृत्वभोक्तृत्वविपरीतं हि त्रिष्वपि कालेषु अकर्तृ अभोक्तृत्व स्वरूपं ब्रह्माहमस्मि । नेतः पूर्वमपि कर्ता भोक्ता अहमासम् । नेदानीं नापि भविष्यत्काले इति ब्रह्मविदवगच्छति ' ॥

स । मूलाविद्यावादे पूर्वमपि अविद्यापरिणतं शरीरमभूत्, जगदप्यभूत् कर्तृत्वं भोक्तृत्वमपि अभूत् । इदानीमपि ज्ञानोत्पत्ति पर्यंतं सर्वे वर्तत एव । अन्ते ज्ञानेन बाध्यते इति ॥

कथं विद्यमानस्यैव अभावः संगच्छते ? विद्यमानस्य

वस्तुनः ज्ञानबाध्यत्वं कथमिति प्रश्नः इदानीं मास्तु । ज्ञानबाध्यत्वाङ्गीकारेऽपि तत्पूर्वं कथं नासीदिति वक्तुम्शक्यते । 'एकमेवाद्वितीयं ब्रह्म' इति तु ज्ञानोत्तरकाले स्यात् । ज्ञानोत्पत्तेः पूर्वं मूलाज्ञानं वर्तते । कथं किमपि नासीदिति वक्तुं शक्यम् । श्रुतिस्तु नासीत्, नास्ति न भविष्यति 'ब्रह्मैव एकं सत्यम्' इति वदति । तस्मादात्मैकत्वज्ञानोत्पत्तिपर्यंतं द्वैतमेव, ज्ञानोत्पत्त्यनन्तरमेव अद्वैतं परमार्थसत्यम् इति वक्तव्यं स्यात् । तस्मादयं मूलाविद्यावादः दुष्टः अश्रौतः अमङ्गलकरः ॥

अध्यासवादे तु अध्यासरूपभ्रांतिकल्पितः प्रपञ्चः । भ्रांतिसत्त्वे प्रपञ्चस्य सत्त्वम् । आत्मानात्मनोरितराध्यासरूपभ्रांत्यभावे प्रपञ्चाभावः सुषुप्तिसमाध्योर्दृष्टत्वात् । भ्रांतिकल्पितः प्रपञ्चः तन्मूलकप्राप्तकर्तृत्वभोक्तृत्वरूपः संसारः कदापि नासीदिति वक्तुं न शक्यम् । यत्र यदध्यासः तत्कृतेन दोषेन गुणेन वा अणुमात्रेणापि आस्पदभूतं ब्रह्म न संबध्यते इत्यतः ब्रह्म एकमेवाद्वितीयं परमार्थभूतमिति वक्तुं शक्यते—इति अध्यासवादः निर्दुष्टः अनुभवप्रधानः श्रौतः मङ्गलकरः एतदर्थप्रकाशनायैव इयं प्रवृत्तिरिति सुधीभिर्ज्ञेयम् ॥

**सुषुप्तौ जीवस्य बीजभावविशिष्टाया ईव सत्संपत्तेर्बोधकानि वाक्यानि, तत्तात्पर्यबोधकानि च वाक्यानि अत्र संगृहीतानि ॥**

(१) सः उपाधिद्वयोपरमे सुषुप्तावस्थायां उपाधिकृतविशेषाभावात् स्वात्मनि प्रलीन इवेति " स्वं ह्यपीतो भवति " इत्युच्यते ॥ सू. भा. १-१-९ पुटम् ३२-३३

तात्पर्यम्

'प्रलीन इम' इत्यस्य 'न प्रलीनः' इत्यर्थं कर्तुं अत्र न शक्यते, अत्रैव 'स्वं ह्यपीतो भवति' इत्युक्तत्वात् ॥ जीवः सदा ब्रह्मैव ॥ जीव इति उपाधिना विशिष्टः आत्मैव अज्ञैर्व्यवहृतः ॥ सुषुप्तौ उपाधेरुपशान्तत्वात् प्रलीन इव इत्युक्तम् ॥ सः यदि यदा कदा वा ब्रह्मभिन्नस्यात्, इदानीं ब्रह्मणि प्रलीनः इति वक्तुं शक्येत ॥ सः सदा ब्रह्मैव । अतः प्रलीन इव इति इवशब्दः प्रयुक्तः ॥ सदा ब्रह्मस्वरूपस्य सुषुप्तौ प्रलीनत्ववचनम् अयुक्तमिति ज्ञात्वा प्रलीन इवेत्युक्तम् ॥

(२) प्रलीयमानमपि चेदं जगत्

शक्त्यवशेषमेव प्रलीयते ॥ सू. भा. १-३-३० पु. १३०

तात्पर्यम्

अत्र शक्तिः का ? माया ।

तस्याः लक्षणं किम् ? मां. का. भा. २-३१ पु ९०

या असद्वस्त्वात्मिका सद्वस्त्वात्मिकेव अवभासमाना सा माया मां. का भा. ४-५८, मायेत्यविद्यमानस्य आख्या ।

अविद्याकल्पिते नामरूपे ........ प्रपञ्चबीजभूते ........ मायाँ, शक्तिः, प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते ॥ सू. भा. २-१-१४ पु. २०१

अविद्याकल्पितेन ........व्याकृताव्याकृतात्मकेन ॥

सू. भा. २-१-२७ पु. २१३

तात्पर्यम्

अविद्याकल्पिता शक्तिः अविद्यायां प्रलीयतं । सुषुप्तौ तस्याः स्थितिः नैव संभवति । अत एव जगत्प्रलयः अविद्या-याम् उक्तः ॥ अध्यासस्य आगमने सापि शक्तिः नियमेन आगच्छति ॥ अध्यासस्तु सम्यग्ज्ञानेन बाधपर्यंतं स्वत एव गच्छतिं, स्वत एव आगच्छति । अध्याम एव अविद्या ।

(३) प्रलीनमपि इदं जगत् शक्त्यवशेषमेव प्रलीयते ॥

सू. भा. १-३-३० पु. १३०

तात्पर्यम्

अत्र शक्तिः का ? अविद्याकल्पिता माया । प्रलयकाले सा कुत्र स्थातुं शक्या ? यया कल्पिता तस्यां स्थातुं शक्या नान्यत्र । अविद्याकल्पिता अविद्यायां वर्तेत, न सुपुप्तौ । या यस्याः कार्यं सा तस्यामेव लीयते, नान्यत्र । सुषुप्तौ जगत्प्रलयः कथं स्यात् । अविद्याकल्पितस्य जगतः अविद्यायमेव प्रलयो युक्तः ॥ अत्रैव प्रलीनत्वमुक्तम् ॥

(१) सुषुप्तिसमाध्यादावपि, सत्यां स्वाभाविक्यां अविभाग प्राप्तौ मिथ्याज्ञानस्य अनपोदितत्वात् पूर्ववत्पुनः प्रबोधे विभागो भवति ॥ सू. भा. २-१-९१ पु. १९१

तात्पर्यम्

सुषुप्तिसमाध्यादौ स्वाभाविकी अविभागप्राप्तिरिति अत्रैव उक्ता । मित्याज्ञानस्स अनपोदितत्वमपि उक्तम् ॥ मिथ्याज्ञानं नाम अध्यासः ॥ सः ज्ञानेन न बाधितः ॥ मिथ्याज्ञानम् (अध्यासः) बाधपर्यंतं स्वयमेव गच्छति, स्वयमेव आगच्छति । सुषुप्तिः सर्वैरनुभूयते । सुषुप्तौ सर्वैरपि अद्विवतीयः आत्मैव अनुभूयते । अनुभवविरुद्धस्य वाक्यस्य अनुभवानुसारेण एव अर्थः कर्तव्यः ॥ अनुभवविरुद्धोऽर्थः न सभीचीनार्थः ॥ अनुभवस्तु स्वाभाविकी अविभागप्राप्तिः ॥ अत्र एका कथा अनुसंधेया । काचन वृद्धा रात्रौ दीपरहिते स्वगृहे सूचीं पातयामास ॥ प्रदीप-युक्तायां वीथ्यां तां विचिनोति स्म ॥ कश्चन दयालुः पान्थः "वृद्धायाः सहायः कर्तव्यः" इति मत्वा वृद्धां 'किं विचिनोषि ?' इति पप्रच्छ । सा तु 'सूचीं विचिनोमि' इति जगाद ॥ स तु 'सूची कुत्र पतिता ?' इति पुनः पप्रच्छ ॥ सा तु स्वगृहे पतिता इत्यब्रवीत् ॥ स तु 'गृहे पतितां सूचीं अत्र किमर्थं विचिनोषि ?' इति पुनः पप्रच्छ । सा तु 'गृहे दीपो नास्ति, अत्र प्रदीपः वर्तते । अतः अत्र विचिनोमि' इत्यवदत् । स तु

गृहे पतितां सूचीं अत्र विचिन्वन्त्याः वृद्धायाः बुद्धिकौशलं स्वमनसि गणयन् 'वृद्धे, गृहं गच्छ, गृहे पतिता सूची अत्र लब्धुं कथं शक्यते ?' इत्युक्त्वा ययौ ।। तद्वत् अध्यासकल्पितां मायां शक्तिं वा अध्यासं विहाय सुषुप्तौ तत्स्थितिं पश्यतां जनान विवेकः वृद्धाविवेकसदृश एव इति ज्ञेयम् ।।

(५) मिथ्याज्ञानपुरःसरोऽयम् आत्मनो बुद्ध्युपाधिसंबन्धः । न च मिथ्याज्ञानस्य संम्यग्ज्ञातादन्यत्र निवृत्तिरस्तीत्यतः यावद्ब्रह्मात्मतानवबोधः तावदयं बुद्ध्युपाधिसंबन्धः न शाम्यति ।।

सू. भा. २-३-३० पु. २८८

## तात्पर्यम्

मिथ्याज्ञानं नाम अध्यासः, अध्यासकल्पितः बुद्ध्युपाधि-सम्बन्धः, न वस्तुभूतः ।। अतो न दोषः । अध्यासकल्पितः अध्यासे वर्तते । नान्यत्र सुषुप्तौ । अयमपि बुद्धिसम्बन्धः शक्त्यात्मना विद्यमान एव सुषुप्तप्रलययोः पुनः प्रबोधप्रसवयो-राविर्भवति ।।

(६) एवं हि एतद्युज्यते । न ह्याकस्मिकी कस्यचित् उत्पत्तिः सम्भवति । अतिप्रसङ्गात् । दर्शयति च

सुषुप्तादुत्थानं अविद्यात्मकबीजसद्भावकारितम् ॥ 'सति सम्पद्य न विदुः सति सम्पद्यामहे' इति ॥

सू. भा. २-३-३१ पु. २८९

तात्पर्यम्

मिथ्याज्ञानम् = अध्यासः ॥ तस्य बीजं = कारणम् अग्रहणम् । मिथ्याज्ञानकल्पितः बुद्धिसम्बन्धः इत्यनेन वस्तुतः बुद्धिसम्बन्धो नास्तीति ज्ञायते ॥ अग्रहणमेव शक्तिः ॥ अग्रहणं यावद्ब्रह्मात्मताऽनवबोधः तावन्न शाम्यति ॥

(७) सुषुप्तप्रलययोः बीजभावावशेषैव एषा सत्सम्पत्तिः ॥

सू. भा. ४-२-८ पु. ४८३

तात्पर्यम्

एषा सत्सम्पत्तिः=इत्यनेन सत्सम्पत्तिरुक्ता । बीजभावः कः ? अग्रहणमेव बीजभावः । तच्च तत्त्वज्ञानोत्पत्तिपर्यन्तं न बाध्यते ॥ अग्रहणमेव बीजम् इत्युक्तम् ॥ तथा च सत्सम्पत्ति-र्विद्यते, सत्सम्पत्तेः पूर्वं ज्ञानेन अग्रहणं न बाधितमित्यर्थः ॥

(८) इह तु विद्यते कर्म च अविद्या च इति ॥

सू. भा. ३-२-९ पु. ३५३

तात्पर्यम्

अविद्या नाम अग्रहणम् । सुषुप्तौ अध्यासः अग्रहणरूपेण विद्यत एव । कर्म=अध्यासकल्पितम् । यावत्पर्यन्तं अध्यासः सम्यग्ज्ञानेन न बाध्यते तावत्पर्यन्तम् अध्यासः, अध्यासकल्पितं कर्म च अग्रहणरूपेण विद्येते एव ॥

(९) आत्मनः सद्रूपताम् अज्ञात्वैव सत्संपद्यन्ते ॥

छां. ६–९–२ पु. ३६७

तात्पर्यम्

अत्रापि सत्सम्पत्तिः अङ्गीकृता । आत्मनः सद्रूपतां जाग्रति ज्ञात्वा सत्सम्पत्तिः एका, आत्मनः सद्रूपतां जाग्रति अज्ञात्वा सत्सम्पत्तिः अन्या । द्वयोरपि सत्सम्पत्तिः विद्यत एव ॥ ज्ञात्वा सत्सम्पत्तौ न पुनर्जीवभावः भवति, अज्ञात्वा सत्सम्पत्तौ पुनर्जीवभावः भवति, अयमेव विशेषः ।

(१०) बीजात्मकताभ्युपगमात् सतः ।

मां. का भा. २२, पु. ३०

तात्पर्यम्

अग्रहणमेव अत्रापि बीजम् । तत्तु सुषुप्ते नास्ति, अन्तःकरणे वर्तते । अन्तःकरणं अध्यासकल्पितम् । अध्यासेन सह गच्छति, अध्यासेन सह आगच्छति ॥

(११) सुषुप्ते अन्य: प्रचार: अविद्यामोहतमोग्रस्तस्य अन्तर्लीनानेकानर्थप्रवृत्तिबीजवासनावत: मनस: ।।

मां. का. भा. ३–३४ पु. १४२

तात्पर्यम्

अविद्याकल्पितमनसि सर्वानर्थप्रवृत्तिबीज़ं वर्तते । मनश्च अविद्याकल्पितम् । अविद्या ज्ञानेनैव बाध्या, नान्यै: ।। अविद्यासत्वे अविद्याकल्पितं सर्व वर्तत एव । अत्रैव मनस: अविद्याकल्पितत्वमुक्तम् ।

(१२) शुद्धम्, निर्मलं—अविद्यामलवर्जितमिति कारणशरीर प्रतिषेध: ।।

ई. भा. १-८, पु. ४

तात्पर्यम्

तत्त्वग्रहणाभाव एय कारणशरीरम् ।।

स तु ग्रहणाभाव: संम्यग्ज्ञानेन न बाधित: इत्यर्थ: ।।

# परिशिष्टम्

## "सुषुप्तौ जीवः परेण ब्रह्मणा एकतां गच्छति" इत्यर्थ-प्रतिपादकानि भाष्यवाक्यानि अत्र संगृहीतानि

(१) सता सोम्य तदा संपन्नो भवति ॥

सू. भा. १-३-१५ पु. १०९

(२) लोकेऽपि किल गाढं सुषुप्तम् आचक्षते ब्रह्मीभूतो ब्रह्मतां गतः इति ॥

सू. भा. १-३-१५ पु. १०९

(३) संप्रसादशब्दोदितं जीवं "स्वेन रूपेण अभिनिष्पद्यते" इति ब्रह्मस्वरूपापन्नं दर्शयन् न परस्मात् ब्रह्मणः अमृताभयस्वरूपात् अन्यं जीवं दर्शयति ॥

सू. भा. १-३-१९ पु. ११४

(४) सुषुप्तौ तावदयं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तः न बाह्यं किंचन वेद नांतरम् ।

सू. भा. १-३-४२ पु. १४३ ; बृ. पु. ६०८, ४-३-२१

(५) सुषुप्तिकाले च परेण ब्रह्मणा जीवः एकतां गच्छति ॥

सू. भा. १-४-१८ पु. १६८

(६) संप्रसादे च प्रपञ्चपरित्यागेन सदात्मना सत्संपत्तेः निष्प्रपञ्चसदात्मत्वम् ।।

सू. भा. २-१-६ पु. २८९

(७) सुषुप्तावस्थायां चेतने अप्ययं दर्शयति ।।

सू. भा. १-१-९ पु. ३३

(८) सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्यां अविभागप्राप्तौ ।।

सू. भा. २-१ ९ पु. १९१

(९) सुषुप्तं प्रकृत्य यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति न हि द्रष्टुर्दृष्टेः विपरिलोपो विद्यते अविनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत् ।।

सू. भा. २-३-१८ पु. २८९

(१०) आत्मा तच्छ्रमापनुत्तये स्वम् आत्मानं परं ब्रह्म प्रविश्य विमुक्तकार्यकरणसंघातः अकर्ता सुखी भवति संप्रसादावस्थायाम् ।।

सू. भा. २-३-४० पु. २९३

(११) नाडीद्वारैणैव ब्रह्मण्येवावतिष्ठते इति प्रतीयते ।।

सू. भा. ३-२-७ पु. ३४९

(१२) सप्तमीनिर्देशोऽपि तत्र वाक्यशेषे दृश्यते सति संपद्य न विदुः सति संपद्यामहे इति ॥

सू. भा. ३-२-७ पु. ३४९

(१३) तत्रापि द्वारमात्रं नाड्यः पुरीतच्च । ब्रह्मैव त्वेकं सुषुप्तिस्थानम् ॥

सू. भा. ३-२-७ पु. ३५०

(१४) सुषुप्तावस्थायां कदाचित् सता संपद्यते कदाचिन्न संपद्यते इति अयुक्तम् ॥

सू. भा. ३-२-७ पु. ३५१

(१५) तत्र सति संपन्नस्तावत् तदेकत्वात् न विजानाति इति युक्तम् ॥

सू. भा. ३-२-७ पु. ३५१

(१६) स्वप्नजागरितयोस्तु उपाधिसंपर्कवशात् पररूपापत्तिमिव अपेक्ष्य तदुपशमात् सुषुप्ते स्वरूपापत्तिर्वक्ष्यते ॥

सू. भा. ३-२-७ पु. ३५१

(१७) आत्मैव सुप्तिस्थानम् ॥

सू. भा. ३-२-७ पु. ३५१

(१८) (सुषुप्तौ) सः परे आत्मनि संप्रतिष्ठते ।।

प्रश्न. ४-४, पु. ४९

(१९) (सुषुप्तौ) यत्र अविद्याकामकर्माणि न संति ।।

बृह. ४-३-२१ पु. ६०५

(२०) (सुषुप्तौ) अभयं रूपं अविद्यावर्जितम् ।।

बृह. ४-३-२१ पु. ६०६

(२१) (सुषुप्तौ) वस्त्वंतरस्य प्रत्युपस्थापिका अविद्या प्रविविक्ता ।।

बृह. ४-३-२१ पु. ६०८

(२२) (सुषुप्तौ) अविद्याया अभावात् आत्मकामम् ।।

बृह. ४-३-२१ पु. ६०९

(२३) अविद्याकामकर्मविनिर्मुक्तमेव तद्रूपं यत्सुषुप्ते आत्मनो दृश्यते प्रत्यक्षतः ।।

बृह. ४-३-२२ पु. ६१०

(२४) सुषुप्ते यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति । न तु तद्द्वितीयमस्ति यद्विभक्तं पश्येत् ।।

बृह. ४-३-२३ पु. ६१७

(२५) वस्त्वन्तरप्रत्युपस्थापिका अविद्या सुषुप्ते शांता ॥

बृह. ४-३-३२ पु. ६२६

(२६) अविद्यया हि द्वितीयः प्रविभज्यते, सा च सुषुप्ते शांता ॥

बृह. ४-३-३२ पु. ६२६

(२७) अविद्याकामकर्मादिसर्वसंसारधर्मातीतं रूपमस्य साक्षात् सुषुप्ते गृह्यते ॥

बृह. ४-३-३४ पु. ६३३

(२८) संप्रसादस्थानं मोक्षदृष्टांतभूतम् ॥

बृह. ६-४-३४ पु. ६३४

(२९) यो हि सुषुप्तावस्थमिव निर्विशेषं अद्वैतं आत्मानं पश्यति सः ब्रह्म भवति ॥

बृह. ४-४-६ पु. ६६०

(३०) यस्माच्चैवं आत्मनः सद्रूपतां अज्ञात्वैव सत्संपद्यंते तस्मात् सत्प्रविष्टा अपि तत्तद्भावेनैव पुनराविर्भवंति ॥

छा. ६-९-३ पु. ३६७

(३१) सुषुप्ते एव स्वं देवतारूपं जीवत्वविनिर्मुक्तं दर्शयिष्यामि ॥

छा. ६-८-१ पु. ३५६

(३२) न ह्यन्यत्र सुषुप्तात् स्वं अपीतिं जीवस्य इच्छंति ब्रह्मविद: ।।

छा. ६-८-१ पु. ३५६

(३३) यत आह–सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति इति स्वशब्देन आत्मा अभिलप्यते स्वरूपं आपन्न: सुप्तो भवतीत्यर्थ: । अपि च न कदाचिज्जीवस्य ब्रह्मणा संपत्तिर्नास्ति ; स्वरूपस्य अनपायित्वात् स्वप्नजागरितयोस्तु उपाधिसंपर्कवशात् पररूपापत्तिमिव अपेक्ष्य तदुपशमात् सुषुप्ते स्वरूपापत्तिर्वक्ष्यते अतश्च सुषुप्तावस्थायां कदाचित्सता संपद्यते कदाचिन्न संपद्यते इति अयुक्तम् ।।

सू. भा. ३-२-७ पु. ३५१

(३४) आत्मन: श्रमाभावं सुषुप्तौ प्राज्ञेनात्मना संपरिष्वक्तस्य श्रावयति ।।

सू. भा. २-३-४० पु. २९३

भाष्ये सुषुप्तौ बीजसद्भावबोधकानीव वाक्यानि संगृहीतानि । तेषामाशयश्च प्रकाशितः ॥

(१) सः उपाधिद्वयोपरमे सुषुप्तावस्थायां उपाधिकृत-विशेषाभावात् स्वात्मनि प्रलीन इवेति " स्वं ह्यपीतो भवति " इत्युच्यते ॥

सू. भा. १-१-९ पु. ३२, ३३

जीवः ब्रह्मणि सदा प्रलीन एव एकत्वात् । उपाधिकृत-विशेषेण जीवः इत्युच्यते । सुषुप्तौ उपाधिकृतविशेषाभावात् इति हेतुः तत्रैव उक्तः । सदाप्रलीनस्य कथं इदानीं प्रलीनत्वं उच्यते ? उपाधिविशिष्टस्य अप्रलीनत्वमिव, उपाधिरहितस्य प्रलीनत्वमिव च द्योतयितुं प्रलीन इवेत्युच्यते सदा प्रलीन एव । तत्रोक्तश्रुतावेव स्वं ह्यपीतो भवति इत्युक्तम् ॥

(२) प्रलीयमानमपि इदं जगत् शक्त्यवशेषमेव प्रलीयते । अत्र शक्तिः का ? जगद्बीजमेव ॥ जगद्बीजं किम् ? अध्यासः ।

सू. भा. १-३-३० पु १३०

कार्यं कारणे लीयते । न अन्यत्र । अतोऽध्यास-कल्पितं जगदध्यासे लीयते, न सुषुप्तौ । अध्यासो यदा स्वयमेव गच्छति तदा अध्यासकल्पितं जगदपि गच्छति । यदा अध्यासः

स्वयमेव आगच्छति तदा तत्कल्पितं जगदपि आगच्छति। अध्यासः कुत्र तदालीनः? स अग्रहणे लीनः। यदा अध्यासः अग्रहणेन सह तत्त्वज्ञानेन बाध्यते तदा अध्यासकल्पितं जगदपि बाध्यते। न पुनरागच्छति।

कालदेशकार्यकारणादयः अध्याससमनन्तरमेव आगच्छन्ति, नाध्यासात्पूर्वं वर्तन्ते। अतोऽध्यासस्य किं कारणमिति प्रश्नः असङ्गतः॥

(३) सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्यां अविभागप्राप्तौ मिथ्याज्ञानस्य अनपोदितत्वात् पूर्ववत् पुनः प्रबोधे विभागो भवति॥

सू. भा. २-१-९ पु. १९१

अविभागप्राप्तिः स्वाभाविकी इति अत्रैवोक्तम्। स्वाभाविक्या अन्यथा कर्तुं न केनापि शक्यते। तस्मात् स्वाभाविकी अविभाग-प्राप्तिः सुषुप्तौ अस्त्येव। अध्यासकल्पितः विभागः अध्यासेन सह गच्छति, अध्यासेन सह आगच्छति। तत्त्वज्ञानेन अध्यासे बाधिते तत्कल्पितविभागोऽपि बाध्यते तावत्पर्यंतं विभागः पुनः पुनः अध्यासेन सह आगच्छत्येव॥

(४) अयमप्यात्मनो बुद्ध्युपाधिसंबन्धः शक्त्यात्मना विद्य-मान एव सुषुप्तप्रलययोः पुनः प्रबोधप्रसवयोराविर्भवति॥

सू. भा. २-३-३१ पु. २८९

मिथ्याज्ञानपुरस्सरोऽयं आत्मनो बुद्ध्युपाधिसंबन्धः, न च मिथ्याज्ञानस्य सम्यग्ज्ञानादन्यत्र निवृत्तिरस्ति इत्यतः यावद्ब्रह्मात्मतानवबोधः तावदयं बुद्ध्युपाधिसंबन्धो न शाम्यति ।

सू. भा. २-३-३० पु. २८८

मिथ्याज्ञानं=अध्यासः मिथ्याज्ञानपुरस्सरः । अध्यासपुरस्सरः ।

अयं बुद्ध्युपाधिसंबन्धः = अध्यासकल्पितः । अध्याससत्त्वे अस्यापि सत्त्वम् । अध्यासाभावे बुद्ध्युपाधिसंबन्धाभावः । शक्तिः बीजं = अध्यास एव । अध्यासरूपेण अध्यासकल्पितं सर्वं जगदेव वर्तते । न सुषुप्तात्मके ब्रह्मणि । प्रबोधप्रसवयोः अध्यासः अगच्छति । बुद्ध्युपाधिसंबन्धोऽपि आगच्छति ।। अध्यासस्तु तत्त्वज्ञानेनैव बाध्यते नान्येन ॥

(५) इह तु विद्यते विवेककारणं कर्म च अविद्या च इति । सुषुप्तौ कर्म विद्यते किम्? न विद्यते इति सर्वानुभवः ।

सू. भा. ३-२-९ पु. ३५३

अतः 'इह' इत्यस्य 'सुषुप्ते' इति न अर्थः । इह इत्यस्य 'अध्यासे' इत्यर्थः । अध्यासकल्पितं सर्वं अध्यासे वर्तते । सुषुप्तौ केवलात्मस्वरूपस्थितेः किं बाधकम्? न किमपि

बाधकमित्यर्थः । इह अविद्या वर्तते इति तत्रैवोक्तम् । यावत्तत्त्व-ज्ञानाभावः तावदविद्या वर्तत एव । अविद्या मनसः वृत्तिरूपा । तस्मात् अविद्या मनसि वर्तते । मनस्तु अध्यासे वर्तते । अध्यास-कल्पितत्वात् । अध्यासस्थितं मनः अन्यत्, प्राणिसामान्यं तत् । अध्यासकल्पितमनोवृत्तिरूपाविद्या अन्या ।।

(६) मिथ्याज्ञाननिमित्तश्च बन्धः न सम्यग्ज्ञानादृते विस्रंसितु मर्हति, तस्मात् तत्प्रकृतित्वेऽपि सुषुप्तप्रलयवत् बीजभावावशेषैव एषा सत्संपत्तिरिति ।।

सू. भा. ४-२-८ पु. ४८३

बीजम् = अध्यासकारणं अज्ञानं अध्यासनिमित्तश्च बन्धः । अध्यासस्तु सम्यग्ज्ञानादेव बाध्यते । इदानीं सम्यग्ज्ञानं न जातम् । तस्मात् अध्यासः न बाधितः । तस्मादेव अध्यासनिमित्तिः बन्धोऽपि न बाधितः इत्यर्थः । एतेन सुषुप्तौ बीजम् नास्त्येवेत्यर्थः ।

(७) आत्मनः सद्रूपताम् अज्ञात्वैव सत्संपद्यन्ते ।।

छां. ६-९-३ पु. ३६७

अग्रहणं बीजम्, अग्रहणं = मनोवृत्तिः । मनस्तु अध्यास-कल्पितम् । अध्यासकल्पितं अध्यासनिष्ठं, न सन्निष्ठम् । तस्मात् सत्संपत्तेर्बाधको नास्ति ।। अध्यासस्थितं मनः अन्यत् । अध्यास-कल्पितं जीवनिष्ठं मनः अन्यत् ।।

(८) निर्बीजतयैव चेत् सति लीनानां संपन्नानां सुषुप्त-प्रलययोः पुनरुत्थानानुपपत्तिः स्यात् ॥

मां. का. भा. १–२ पु. ३०

अत्रैव सति लीनानां संपन्नानामिति सत्संपत्तिरुक्ता। बीजं तु अग्रहणम्। तत् ज्ञानेन न बाधितम्। तस्मात् अस्त्येव बीजं, तत्तु सुषुप्तौ ब्रह्मस्वरूपे नास्ति तस्माददोषः ॥

(९) सुषुप्ते अन्यः प्रचारः अविद्यासहितस्य मनसः।

मां. का. भा. २-३४ पुट १४२

अविद्या = अध्यासः। सः तत्त्वज्ञानेन न बाधितः इत्यर्थः। अध्यासे सति अध्यासकल्पितः सर्वोऽपि वर्तते एव। तत्त्वज्ञाने जाते अध्यासः बाध्यते। तत्त्वज्ञानप्राप्तिपर्यंतं अध्यासः वर्तत एव ॥

(१०) शुद्धं = निर्मलं = अविद्यामलवर्जितम्। इति कारणशरीरप्रतिषेधः ॥

ईशावास्य भा. १-८ पुट ४

कारणशरीरम् अग्रहणं, मनः = अध्यासे। अध्यासाऽग्रहणे। तत् ब्रह्मणि नास्ति मनसि वर्तते।

(११) वीजात्मकत्वाभ्युपगमात् सतः ॥

मां. का. भा. १–२ पु. ३०

वीजम् = अग्रहणरूपा अविद्या ॥ स मनसः भ्रान्तिः।

## भाष्यकारोक्तमायास्वरूपप्रतिपादकवाक्यानि संगृहीतानि ।

(१) स्वप्नश्च माया च स्वप्नमाये असद्वस्त्वात्मिके सद्वस्त्वात्मिके इव लक्ष्येते अविवेकिभिः ।

मां. का. भा. २-३१ ; पु. ९०

(२) सा च माया न विद्यते ।
मायेत्यविद्यमानस्य आख्या ।

मां. का. भा. ४-५८ ; पु. १९६

(३) सर्वज्ञस्य ईश्वरस्य आत्मभूते इव अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यां अनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञेश्वरस्य माया, शक्तिः, प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते ।

सू. भा. २-१-१४ पु. २०१

(४) अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते । पारमार्थिकेन च रूपेण सर्वव्यवहारातीतं अपरिणतमवतिष्ठते ।।

सू. भा. २-१-२७

(५) तत्र कल्पितरूपप्रत्याख्यानेन ब्रह्मणः स्वरूपावेदनमिति निर्णीयते। तदास्पदं हि इदं समस्तं कार्यं नेति नेतीति प्रतिषिद्धम्।

सू. भा. ३-२-२२ ; पु. ३६५

(६) अविद्यात्मिका हि बीजशक्तिः। अव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्तिः। यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः॥

सू. भा. १-४-३ ; पु. १४९

(७) एवं अविद्याकृतनामरूपोपाध्यनुरोधी ईश्वरो भवति। स च स्वात्मभूतानेव अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरण-सङ्घातानुरोधिनः जीवाख्यान् विज्ञानात्मनः प्रतीष्टे व्यवहारविषये॥

सू. भा. २-१-१४ ; पु. २०१

(८) अविद्यात्मकोपाधिपरिच्छेदापेक्षमेइ ईश्वरस्य ईश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च।

सू. भा. २-१-१४ ; पु. २०१

(९) अविद्यात्मकनामरूपबीजव्याकरणापेक्षत्वात् सर्वज्ञत्वस्य॥

सू. भा. २-१-१४ ; पु. २००

(१०) उपाधीनां अविद्याप्रत्युपस्थापितत्वात्॥

सू. भा. ३-२-११ ; पु. ३५६

(११) माया त्रिगुणात्मिका अविद्यालक्षणा प्रकृतिः ।।

भ. गी. भा. ९–१० पु. २०६

(१२) प्रकृतिं स्वां । भाष्ये अविद्यालक्षणां प्रकृतिम् ।

भ. गी. भा. ९–८ पु. २०४

(१३) सर्वो ह्ययं व्यक्ताव्यक्तलक्षणमहासंसारः अविद्या-विषयः ।

बृह. भा. १-५-२ पु. २०६

(१४) अविद्यालक्षणादव्यक्तात् ।

भ. गी. भा. ८-२० पु. १९६

(१५) स्वभावः अविद्यालक्षणा प्रकृतिः, माया ।

भ. गी. भा. ५-१४ पु. १३५

(१६) अहंकार इति अविद्यासंयुक्तं अव्यक्तम् ।।

गी. भा. ७-४ पु. १७३

(१७) अज्ञानजं अविवेकतः जातं मिथ्याप्रत्ययलक्षणं मोहान्धकारं तमः ॥

गी, १भा.०-११

(१८) यथा मायाविना विहिता माया गगनम् अतिविमलं कुसुमितैः सपलाशैः तरुभिः अकीर्णमिव करोति तथा इयमपि देवस्य माया ॥

मां. का. भा. २-१९

सूत्रभाष्ये २-१-१४, २-१-२७, ३-२-२२ त्रिषु स्थलेषु नामरूपलक्षणायाः मायायाः अविद्याकल्पितत्वं स्पष्टमुक्तम्। अतः यत्र अविद्यालक्षणात्, अविद्यात्मकात्, अविद्याकृतात् इत्यादिशब्दाः प्रयुज्यन्ते तत्र सर्वत्र मायायाः प्रकृतेः एकत्वात् अविद्याकल्पितात् इत्येव ज्ञेयम् ॥

**भाष्यकाराणाम् अभिप्रायानुसारेण अध्यास एव मुख्या अविद्या वार्तिककाराणाम् अभिप्रायानुसारेण अग्रहणमेव मुख्याविद्या इत्यर्थबोधकानि वाक्यानि अत्र संगृहीतानि ।**

(१) तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते ॥

सू. भा. अध्यासभाष्यम् ।

(२) अस्यानर्थहेतोरध्यासस्य प्रहाणाय आत्मैकत्वविद्या-प्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते ॥

सू: भा. अध्यासभाष्यम् ।

(३) देहादिषु अनात्मसु अहमस्मीति आत्मबुद्धिः अविद्या ॥

सू. भा. १-३-२ पु. ९५

(४) मोहस्तु विपरीतप्रत्ययप्रभवः अविवेको भ्रमः । स च अविद्या सर्वस्य अनर्थस्य प्रसवबीजम् ॥

बृ. भा. ३-५-१ पु. ४५३

(५) विपरीतज्ञानव्यवधानापोहार्थत्वात् ज्ञानस्य ॥

बृ. भा. १-४-७ पु. १४५

(६) यदि ज्ञानाभावः, यदि संशयज्ञानं, यदि विपरीतज्ञानं वा उच्यते अज्ञानमिति सर्वं हि तत् ज्ञानेनैव निवर्त्यते ।।

बृ. ३-३ पु. ४२५

(७) अविद्याकामकर्मविनिर्मुक्तमेव तद्रूपं यत्सुषुप्ते आत्मनो गृह्यते प्रत्यक्षतः इति ।।

बृ. भा. ४-३-२२ पु. ६१०

(८) इदमविद्यायाः सतत्त्वमुक्तं भवति । सर्वात्मानं सन्तं असर्वात्मत्वेन ग्राहयति । आत्मानम् असर्वं आपादयति । आत्मनोऽन्यद्वस्त्वन्तरं अविद्यमानं प्रत्युपस्थापयति ।।

बृ. भा. ४-३-२० पु. ६०४

(९) अविद्यायाः विपरीतज्ञानात् ।।

प्रश्न भा. ६-६

(१०) ज्ञात्वा विमुच्यते इति सामर्थ्यात्................ श्रोत्राद्यात्मभावं परित्यज्य ।।

केन भा. १-२ पु. ८

(११) आत्मस्वरूपानिश्चयहेतोः अविद्यया कल्पिताः इति पिण्डीकृतोऽर्थः ।।

मां. २-२८

(१२) अवगमानर्थक्यमपीति चेन्न अनवगमनिवृत्तेः दृष्टत्वात् । बृ. भा. १-४-१० पु. १५५

(१३) न हि कचित् साक्षाद्वस्तुधर्मस्यापोढ्री द्रष्टा कर्त्री वा ब्रह्मविद्या । अविद्यायास्तु सर्वत्रैव निवर्तिका दृश्यते ।।

बृ. भा. १-४-१० पु. १५३

(१४) अविद्या विपरीतग्राहकः संशयोपस्थापकः अग्रहणात्मको वा, विवेकप्रकाशभावे तदभावात् ।।

गी. भा. १३-२, पु. २८२

(१५) नामरूपाद्यनात्माध्यारोपणनिवृत्तिरेव कार्या ।।

गी. भा. १८-५० पु. ४१६

(१६) आत्मनि अवगते, देहादिसङ्घाते अहंप्रत्ययः बाध्यते ।। गी. भा. १८-६६ पु. ४३८

(१७) क्रियाकारकफलभेदबुद्धिरविद्या आत्मनि नित्यप्रतता ।।

गी. भा. १८-६६-१९ पु. ४३८

(१८) दृश्यते हि एकत्वज्ञानादेव अनवगमनिवृत्तिः ।।

बृ. भा. १-४-१० पु. १५५

(१९) अज्ञानमिथ्यासंशीतिव्यतिरेकेण नापरं प्रत्यर्थिमेव-विषये मानस्येहास्ति किञ्चन ।। वार्तिका पु. ७८९

of Adhyatma Prakasha Karyalaya, Holenarasipur of Karnataka State.

Who was an institution by himself in disseminating Shankaracharya's works. As a scholar of Adwaitha Philosophy Sri Swamiji is a strict adherent to Shankara's exposition of Adwaita, and therefore to read Sri Swamiji is to know Shankara in the original without the risk of being strayed into the jungle of the later commentaries.

**Sri Gyanandendrasaraswathi Swamy's other works**

(1) Moolavidya Bhashyavarthika Virudhaa (in Samskrita and in Kannada.)

(2) Sri Shivananda's Upadeshas (in Kannada)

(3) Parvanasraddha thithinirnaya (in Kannada)

(4) Moolavidya Vimarshe (in Kannada)

(5) Sankarasiddhantha (in English)

(6) Sankarasiddhantha (in Sanskrit and in Kannada)